Digitization by eGangotri-South Center

राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला-९८

बालधन्वि-रङ्गाचार्यस्वामिविरचितं

# सावित्र्यर्थसर्वस्वम्

सम्पादकः

आचार्यः वा. इ. गोविन्दन्

राष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

तिरुपतिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला-९६

बालधन्वि-रङ्गाचार्यस्वामिविरचितं

# सावित्र्यर्थसर्वस्वम्

सम्पादकः
आचार्यः का. इ. गोविन्दन्

राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपतिः (आं. प्र.)
२००३

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रकाशकः

प्रो० डि० प्रह्लादाचार्यः

कुलपतिः

राष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

तिरुपतिः - ५१७५०७ (आं० प्र०

प्रथमं संस्करणम् : २००३

मुद्रितपुस्तकानि : ५००

सर्वेऽधिकाराः विद्यापीठेन स्वायत्तीकृताः

मूल्यम्— Rs 43 = 00

मुद्रकः—

अमरप्रिंटिंगप्रेस

८/२५ विजयनगर, दिल्ली - ११०००९

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रो० डि. प्रह्लादाचार्यः
*कुलपतिः*

राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपतिः - 517 507

दिनाङ्कः 10-02-2003

## आमुखम्

महदिदं मे प्रमोदस्थानं यदद्य शास्त्रसंरक्षणाय, संस्कृतभाषायाः सर्वतोमुखविकासाय च सततं प्रयतमानेनानेन विश्वविद्यालयेन बालधन्विवंश्यैः सत्तर्कवाचस्पतिभिः श्रीबालधन्विरङ्गाचार्यस्वामिभिः प्रणीतं **सावित्र्यर्थसर्वस्वं** नाम लघ्वपि बहुसूक्ष्मार्थगर्भितं ग्रन्थरत्नं देवनागरलिप्यामैदम्प्राथम्येन विदुषां पुरतः समर्प्यत इति। अत्र हि सावित्र्यर्थसर्वस्वे श्रीरङ्गाचार्यस्वामिभिः विभिन्नमतानां विमर्शनपूर्वकं गायत्रीप्रतिपाद्यः श्रीमन्नारायण एवेति विविधैः प्रमाणैः सुष्ठु प्रतिपाद्यते। ग्रन्थकर्तृवाक्यग्रथनशैली न्यायनयानुवर्तिनी, लक्षणपरिष्कारभूयिष्ठा च वरीवर्ति। अत्र ग्रन्थे बहुत्र वाक्यार्थवर्णनोपयोगिन्यः व्युत्पत्तयः प्रादर्शिषत।

एष च निरुपमो ग्रन्थः अस्य विद्यापीठस्य न्यायविभागे आचार्यपदं विभूयद्भिः आचार्यैः का.इ.गोविन्दन् महाभागैः, स्वपूर्वजैः परिरक्षितां प्रतिलिपिमाधारीकृत्य श्लोकपादोद्धरणसूच्यादिनिर्माणपूर्वकं सम्पाद्य प्रकाशनाय समार्प्यत। एवमेव ग्रन्थस्थाः विशेषांशाः महामहोपाध्यायबिरुदाङ्कितैः विद्यापीठस्य प्रथमकुलपतिभिः श्रीमद्भिः डॉ. एन्.एस्. रामानुजताताचार्यमहोदयैः **प्ररोचनायां** सम्यक् प्राकाश्यं नीताः। एतादृशम् अनुपमं ग्रन्थरत्नं महता प्रयत्नेन सुपरिश्रम्य सम्पादितवताम् आचार्याणां **का. ई. गोविन्दन्**-महोदयानां कृते साधुवादान् आविष्करोमि। ग्रन्थविशेषप्रख्यापकप्ररोचनाप्रणेतॄणां महामहोपाध्यायानां डॉ. एन्. एस्. रामानुजताताचार्यमहोदयानां कृते विद्यापीठपक्षतः सश्रद्धां कृतज्ञतां विज्ञापयामि।

**प्रो.डि. प्रह्लादाचार्यः**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

# प्ररोचना

बालधन्विरङ्गाचार्यस्वामिविरचितः **सावित्र्यर्थसर्वस्वनामा** ग्रन्थः गायत्रीमन्त्रस्य पाशुपतमतानुयायिभिः शिवपरतया कृतस्य व्याख्यानस्य खण्डनपूर्वकं नारायण(विष्णुपरतया) व्याख्यानरूपः । अत्र प्रतिपाद्याः विषयाः संगृह्यन्ते ।

१. तत् सवितुर्वरेण्यम् । भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् इति गायत्रीमन्त्रः । अत्र भर्गशब्दः अकारान्तः शिववाचकः । यो भर्गः शिवः नः अस्माकं धियः बुद्धिवृत्तीः प्रचोदयात् प्रेरयति, सवितुर्देवस्य मण्डले वर्तमानं तं वरेण्यं भर्गं ध्यायामः इति व्याख्यानस्य अनुवादः ।

२. तस्य खण्डनमेवम् । द्वितीयवाक्यस्थस्य भर्गशब्दस्य तृतीयवाक्यस्थेन यच्छब्देनान्वयो न संभवति । पदान्तरव्यवहितत्वात् । तथा देवस्य धीमहीति पदयोः प्रथमवाक्येनान्वयो न संभवति । भर्गशब्दव्यवहितत्वात् । एकवाक्यस्थस्य पदस्य वाक्यान्तरेणान्वये तद्वाक्यघटकपदानां स्वघटितवाक्याघटकपदव्यवहिततया निराकाङ्क्षत्वेन निराकाङ्क्षवाक्यस्य च शाब्दबोधजनकज्ञानाविषयतया तत् सवितुः इत्यारभ्य धीमहीत्यन्तस्य अप्रामाण्यापत्तिः । अपि च तदिति नपुंसकलिङ्गानुपपत्तिः । मण्डले इति पदाध्याहारश्च प्रसजति ।

३. यत्तु-मैत्रायणीयोपनिषदि "भर्ग इति रुद्रो ब्रह्मवादिनः" इति रुद्रस्य भर्गशब्दवाच्यत्वश्रवणात् पदान्तरव्यवधानेऽपि योजनया शाब्दबोधस्य काव्यादिषु दर्शनात् श्रुतौ च प्रकृतिप्रत्ययोपसर्गादीनां व्यवधानेऽपि संभूयार्थबोधकत्वदर्शनाच्च सर्वमुपपन्नमिति । तन्न ।

तस्यामेवोपनिषदि अथ भर्गो देवस्य धीमहि इति प्रतीकमुपादाय "सविता वै देवः स्थितः योऽस्य भर्गस्तं चिन्तयामि" इति व्याख्यानेन सवितृस्थं भर्गं धीमहि इत्यर्थस्यैवावगमेन भर्गपदस्य द्वितीयपाद एवान्वयप्रदर्शनेन तस्य वाक्यान्तरेऽन्वयकल्पनस्यायुक्तत्वात् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



न च तत्स्थं भर्गं धीमहीत्यस्यैव सामञ्जस्ये यो भर्ग इति कथनं वाक्यान्तरेण भर्गपदस्यान्वयं दर्शयतीति वाच्यम्।

"प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्यमुपास्महे" इति स्मृतिसारूप्येणास्यापि तदुपजीव्यतया तत्समानार्थताया एव युक्तत्वात्।

४. किं चास्मिन्नेव खण्डे "अथ योऽस्य तामसोंऽशः स रुद्रः" इति तमोगुणमूर्तित्वेनाभिहितस्य रुद्रस्य मुमुक्षूपास्यत्वं न संभवतीति मुमुक्षूपास्यदेवताबोधकगायत्रीवेद्यत्वं न संभवति। अस्यामेवोपनिषदि "अथ खलु वा अस्य योऽयं सात्त्विकोंऽशः सोऽसौ विष्णुः" इति विष्णोरेव शुद्धसत्त्वमयश्रवणेन विष्णुपुराण भागवतादिषु मुमुक्षूपास्यतया असकृत् प्रतिपादितस्य विष्णोरेव गायत्रीप्रतिपाद्यत्वं युक्तम्।

५. एवं "तारके" "अक्षिण च" इति अक्षिपुरुषबोधात् उपकोसलविद्याप्रत्यभिज्ञानात् उपकोसलविद्यायां च परमात्मन उपास्यत्वस्य उपसितुरर्चिरादिमार्गेण ब्रह्मप्राप्तेश्चाभिधानात् तादृशाक्षिपुरुषतादात्म्यस्य रुद्रे बाधात् न तस्य उपासनविषयतया कीर्तितभर्गशब्दवाच्यत्वं संभवति। अर्चिरादिमार्गेण प्राप्यं ब्रह्म च विष्णुरेवेति कठवल्लीब्रह्मसूत्रादिषु स्पष्टमुक्तम्।

६. किं च अस्यामेवोपनिषदि अन्ते गायत्रीविद्योपास्य आदित्यः रुद्रभवशिवप्रजापतिब्रह्माग्निविष्णुनारायणादित्यशब्दैरनूदित इति तस्या गायत्र्याः परमात्मपरत्वमेव, न तु तदतिरिक्तदेवतापरत्वम्। परमात्मा च नारायण एवेति।

**परमात्मा च सर्वेषामाधारः परमेश्वरः।**
**विष्णुनामा स वेदेषु वेदान्तेषु च गीयते॥**

इति पराशरेणोक्तम्।

७. अपि च याज्ञवल्क्यस्मृतौ यतिधर्मप्रकरणे मोक्षसाधनतया ब्रह्मध्यानरूपं योगं विधाय तत्र प्रवृत्तये इतरविषयेषु वैराग्यसंपत्तये ऐहिकामुष्मिकभोगेषु अल्पत्वास्थिरत्वदोषमूलत्वादिकं विस्तरेणोक्त्वा ध्यानयोगस्य अपुनरावृत्तिलक्षणमोक्ष-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



फलकत्वं चोक्त्वा पुनः संसाररहितपरमपदप्राप्तिरेव मोक्ष इत्यभिधाय अर्चिरादि-मार्गेण तत्प्राप्तिरभिहिता । ईदृशयोगरहितस्य तु

गीतिज्ञो यदि योगेन नाप्नोति परमं पदम् ।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥

इति रुद्रसायुज्यरूपं फलमुपदिदेश । तस्मात् मुमुक्षुणा रुद्रो नोपासनीय इति याज्ञवल्क्यस्य आशयोऽवगम्यते ।

८. इत्थं च गायत्र्याः रुद्रपरत्वे निरस्ते विष्णुपरत्वे च सिद्धे एवं वाक्यार्थो वर्णनीयः—भर्गस् शब्दः सकारान्तनपुंसकलिङ्गः प्रथमान्तः । तच्छब्दः द्वितीयान्तः नपुंसकलिङ्गः । तच्छब्दश्रवणात् यच्छब्दोऽध्याहार्यः । सवितृशब्दः जगत्प्रसवितृ-वाची । "सविता प्रसवानामीशे" इत्यादि श्रुतेः । वरेण्यं, "वृङ् संभक्तौ" इति धातोः एण्यप्रत्ययः । सर्वेषां संभजनीयं भर्गः तेजः । भञ्जनात् भर्गः प्रकाशदानेन जगतः बाह्याभ्यन्तरतमोभञ्जकत्वात् । भर्जनाद्वा भर्गः, कालात्मकतया सकलकर्मफलपाक-हेतुत्वात् । भरणाद्वा भर्गः, वृष्टिप्रदानेन भूतानां भरणहेतुत्वात् । य इति तृतीयपादे श्रवणात् तस्येत्यध्याहार्यम् । तथा च य सविता नः अस्माकं, धियः हानोपादान-विषयाणि ज्ञानानि प्रचोदयात् प्रचोदयति प्रेरयति तस्य सवितुः विष्णोः यत् वरेण्यं भर्गः तेजः तत् धीमहि चिन्तेयम इति । वस्तुतः मन्त्रस्थः तदिति शब्दः प्रसिद्ध्यर्थकः । अतो यच्छब्दाध्याहारस्य नावश्यकता ।

सर्वमिदमभिसन्धाय गायत्र्यर्थवर्णनपरः श्लोकः श्रीमन्त्रिगमान्तमहादेशिकै-रनुगृहीतः—

प्रतिपुरुषमनेकाः प्रत्यवस्थं विचित्राः
शुभगतिषु धियो यश्चोदयत्यञ्जसा नः ।
अखिलचिदचिदन्तर्यामि तद्विष्णुसंज्ञं
सवितुरहमुपासे तस्य देवस्य भर्गः ॥

(शतदूषणी २३ वादः)

अन्येऽपि व्याख्यानप्रकाराः प्रकृतग्रन्थकारेण प्रदर्शिताः तत्रैव द्रष्टव्याः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



९. प्रकृतग्रन्थकारेण गायत्र्याः रुद्रपरत्वे अनौचित्यं विष्णुपरत्वे औचित्यं च 'अत्रायं विवेक' इत्यादिना यदुक्तं तदवधानमर्हतीति तत् सर्वैः सावधानं द्रष्टव्यमिति प्रार्थयामहे । (पृष्ठसंख्या-१०)

१०. अयं च ग्रन्थकारः महानैयायिकः विशिष्य च नव्यन्याये कृतभूरिपरिश्रम इति एतद्ग्रन्थपठितॄणां नव्यनैयायिकानां सुखावगमम् । अत्र बह्व्यः वाक्यार्थवर्णनोपयोगिन्यः व्युत्पत्तयः प्रादर्शिषत । तथाहि—

(१) तद्धर्मपर्याप्तावच्छेकताकविषयताशालिशाब्दत्वावच्छिन्नं प्रति तद्धर्मघटकधर्मप्रतिपादकानां तादृशपदाव्यवहितत्वघटिताकाङ्क्षाज्ञानस्यैव हेतुता । (पृ. १.)

(२) तत्पदरूढ्यर्थविषयकशाब्दबुद्धौ पदान्तरार्थप्रकारतानिरूपित- तत्पदावयवार्थनिष्ठविशेष्यताशालिशाब्दसामग्र्याः प्रतिबन्धकत्वम् । (पृ. ४ )

(३) इतिशब्दसमभिव्याहारे इतिपदोत्तरवाक्यस्य पूर्ववाक्यापेक्षया भिन्नवाक्यत्वम् । (पृ. ५)

(४) अभेदसंसर्गावगाहिशाब्दबुद्धौ समानविभक्तिलिङ्गकविशेष्यविशेषणवाचकपदसमभिव्याहारस्यैव हेतुत्वात् । (पृ. १०)

(५) दीर्घानुगमघटितः परिष्कारः । (पृ. १२-१३)

(६) शाब्दबोधे उद्देश्यविधेयवाचकपदयोः पौर्वापर्यज्ञानस्य आकाङ्क्षाज्ञानत्वेन हेतुतायाः तान्त्रिकैः अङ्गीकारात् तस्य चाव्यवहितोत्तरत्वसंसर्गावच्छिन्नोद्देश्यवाचकपदनिष्ठप्रकारतानिरूपितविधेयवाचकपदनिष्ठविशेष्यताशालिज्ञानपर्यवसिततया । (पृ. १४)

(७) १५-८. पृष्ठेषु प्रसङ्गात् न्यायलक्षण-प्रतिज्ञा-लक्षणोपनयलक्षणनिगमनलक्षणानां परिष्काराः दीधितिगदाधरीयपरिष्कारोपरि दोषानाशङ्क्य कृताः विदुषां मोदाय कल्पन्ते ।

एवं शिवतत्त्वविवेके अप्पयदीक्षितकृतानां शिवपरतया गायत्रीव्याख्यानप्रकाराणां च खण्डनमिह सविस्तरं कृतं १९-२३ पृष्ठेषु ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



(८) एकस्मिन् धर्मिणि विरुद्धकालावच्छिन्नवृत्तिकयोः धर्मयोः धर्मिनिष्ठतादात्म्यसंसर्गप्रतियोगित्वानुयोगित्वयोः अवच्छेदकत्वे मानाभावेन । (पृ. २६)

इत्थं लघुरपि बह्वर्थगर्भितोऽयं ग्रन्थः विदुषामुपजीव्यः प्रशंसनीयश्च ।

न्यायवेदान्तादिशास्त्रसर्वस्वविदा विद्वद्वरेण श्रीमद्गोविन्दाचार्येण एकामेव मातृकामवलम्ब्य सम्यक् परिशोध्य प्रकाश्यमानः अयं ग्रन्थः विद्यास्थानेषु विद्वद्गृहेषु च स्थापनार्हः असकृत् परिशीलनार्हः व्युत्पत्त्याधायकश्चेति सुदृढं विश्वसिमि । संपादकस्य श्रीगोविन्दाचार्यस्य आयुरारोग्यैश्वर्यादिकमुत्तरोत्तरग्रन्थप्रकाशनोपयोगि अनुगृह्णातु स भगवान् वेङ्कटाचलाधीशः श्रीनिवास इति प्रार्थये ।

२१.१०.२००० —एन्. एस्. रामानुजताताचार्यः

बेंगलूरु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

# उपोद्घातः

प्रतिपुरुषमनेकाः प्रत्यवस्थं विचित्राः
शुभगतिषु धियो यश्चोदयत्यञ्जसा नः ।

अखिलचिदचिदन्तर्यामि तद्विष्णुसंज्ञं
सवितुरहमुपासे तस्य देवस्य भर्गः ॥

समधिगतगौतमपातञ्जलजैमिनिबादरायणशास्त्रैः कौशिकगोत्रे बालधन्वि-वंशे कृतावतारैः स्वनामधन्यैः सत्तर्कवाचस्पतिबिरुदाङ्कितैः श्रीरङ्गाचार्यस्वामिभिः बहुदुरूहसूक्ष्मार्थगर्भितं गायत्र्यर्थविनिर्णायकं **सावित्र्यर्थसर्वस्वं** नाम ग्रन्थरत्नम् इदं प्रथमतया देवनागरिलिप्यां मुद्राप्य विदुषां पुरतः समर्प्यत इति हृष्यति मे चित्तम् ।

इमे च रङ्गाचार्याः के ? कौ जनकौ ? का वा कृतयो विरचिताः इत्यादिविषये यावत्सामग्री समासादिता सा विदुषां पुरतः समुपस्थाप्यते । तथाहि—

**सव्याख्याधिकारसंग्रहदीपिकाख्यप्रबन्धादौ** कीर्तयन्ति वेङ्कटाचार्यपुत्रत्वेन आत्मानम् ।

श्रीमत्सारास्वादिनीव्याख्ययार्थान्
बुद्ध्वा तासां कौशिको रङ्गदासः ।
श्लोकानेतान् वेङ्कटाचार्यसूनुः
तत्कारुण्यप्राप्तबोधो लिलेख ॥'

इति ।

एवं नक्षत्रमालाग्रन्थस्यादौ—

वैश्वामित्रादशेषक्षितितलतिलकाद्वाक्पतेर्मर्त्यमूर्तेः
तत्तादृग्बालधन्व्यन्वयजलधिविधोर्वेङ्कटार्यादुदीतः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



श्रीरङ्गाचार्यस्सुमेधाः श्रुतिमुकुटवचोनिर्मलीभूतचेता
न्याये निस्सीमभूमा कलयति विदुषां प्रीतयेऽमुं प्रबन्धम् ॥

इति च ।

एवमेव **जन्माष्टमीव्रतनिर्णय**प्रबन्धारम्भेऽपि वेङ्कटदेशिकतनयत्वेन कथनात् कौशिकगोत्रे बालधन्विवंशे लब्धजन्मानः वेङ्कटाचार्याः श्रीरङ्गाचार्याणां पितृचरणा इति सिद्धम् । इमे च रङ्गाचार्याः श्रीमदहोबिलमठास्थाने षट्त्रिंशे पट्टे मूर्धाभिषिक्तानां श्रीश्रीनिवासयतीन्द्रमहादेशिकानां काले (१८८८ वर्षे) आस्थानपण्डितपदे आसन्निति (१९९२ वर्षे प्रकाशिते आचार्यवैभवग्रन्थे पृष्ठे ३५३) ज्ञायते । तथा चैतेषां स्थितिकालः ऊनविंशतिशतकस्य मध्यभागः, ततः पूर्वं वेति वक्तुं शक्यते ।

एतेषां कृतयः अद्य यावदस्मच्चक्षुष्पथमवतरन्ति संख्यया सप्त । ता इमाः—(१) अधिकारसंग्रहदीपिका पद्यमयी (२) अधिकारसंग्रहदीपिका व्याख्या (३) जन्माष्टमीव्रतनिर्णयः (४) वण्शठवैरिगद्यम् (५) श्रीवण्शठारातियतीन्द्रपद्य प्राथम्यवादः (६) सामान्यनिरुक्तिटिप्पणी न्यायनक्षत्रमाला (७) सावित्र्यर्थसर्वस्वमिति आकारेण लघ्व्यः अपि गम्भीरार्थपुष्कला इति ग्रन्थावलोकनेन स्पष्टं ज्ञातुं शक्यते ।

**अधिकारसंग्रहदीपिका** —सकललोकसंभावनीयस्य विश्वातिशायिनो विश्वामित्रगोत्रभूषणस्य विशुद्धविद्याविहारपुण्डरीकस्य पुण्डरीकाक्षसोमसुत्संभवस्यानन्तगुणशेवधेरनन्तसूरेरात्मसंभवैः श्रीरङ्गराजदिव्याज्ञालब्धवेदान्ताचार्यपदैः कवितार्किकपञ्चास्य इति प्रख्यातगुणसमाख्यैः छात्रजननिबद्धजैत्रध्वजप्रसाधितदशदिशासौधैः सर्वतन्त्रसङ्कटप्रशमनविशङ्कटमतिभिः श्रीमन्निगमान्तमहादेशिकैरनुगृहीते श्रीमद्रयस्यत्रयसारे प्रत्यधिकारमारम्भेऽवसाने च तत्तदधिकारार्थप्रकाशकतया सुरगिरा, द्रविडभाषया च श्लोकाः प्रसादिताः । तत्र द्राविडगाथानाम् अर्थाः तद्भाषानभिज्ञैरपि ज्ञेया इति मनीषया पद्यरूपेण गैर्वाण्यामनूदितोऽयं ग्रन्थः ।

**अधिकारसंग्रहदीपिकाव्याख्या**—उपर्युक्तपद्यमयग्रन्थस्य पाठकानामर्थावगमने क्लेशो माभूदिति स्वयमेव विपुलां व्याख्यामकार्षुः । ग्रन्थद्वयमप्येतत्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



(1969 वत्सरे Bulletin of the Government Oriental Manuscripts Library, Madras, Vol. XIX, No..1) प्रकाशितम्।

**जन्माष्टमीव्रतनिर्णयः**—ग्रन्थेऽस्मिन् जन्माष्टमीव्रतं कदा कस्मिन् मुहूर्तेऽनुष्ठेयमिति धर्मशास्त्रग्रन्थानालोड्य शास्त्रशैल्या विचार्य निर्णीतम्। ग्रन्थोऽयं बहुवर्षेभ्यः प्राक् ग्रन्थलिप्यां प्रकाशितः।

**वण्शठवैरिगद्यम्**—अस्मिन् ग्रन्थे श्रीमदहोबिलमठसंस्थापकानां कर्णाटकप्रदेशे कृतावताराणां श्रीमद्वेदमार्गपरमहंसपरिव्राजकेत्याद्यन्वर्थबिरुदभूषितानां श्रीमदादिवण्शठकोपयतीन्द्रमहादेशिकानां गुणवर्णनं कृतम्। श्रीमन्निगमान्तमहादेशिकविरचितरघुवीरगद्यवत् सरसपदततिगुम्फितम् इदं बहुकालात् पूर्वं ग्रन्थलिप्यां मुद्रितमपि १९९८ वर्षे श्रीमहदहोबिलमठषट्शताब्दिपूर्त्युत्सवावसरे श्रीमदहोबिलमठे पञ्चचत्वारिंशे पट्टे मूर्धाभिषिक्तैः श्रीलक्ष्मीनृसिंहदिव्यपादुकासेवकश्रीवण्शठकोपश्रीनारायणयतीन्द्रमहादेशिकैः सकलजनमनोविनोदाय देवनागरिलिप्यां मुद्रापितम्।

**श्रीवण्शठारातियतीन्द्रपद्यप्राथम्यवादः**—निबन्धेऽस्मिन् दिव्यसूरि (आल्वार्) विरचितदिव्यप्रबन्धपारायणोपक्रमे श्रीमन्निगमान्तमहादेशिकविषयं 'रामानुजदयापात्रम्' इति पद्यं संसेव्य तदनु पूर्वाचार्यपद्यानुसन्धानं विधीयते सर्वैः श्रीमन्निगमान्तमहादेशिकसंप्रदायानुसारिभिः श्रीवैष्णवैः। तत्र श्रीमदहोबिलमठसंप्रदायानुसारिभिः तन्मठस्थापकश्रीमदादिवण्शठकोपयतीन्द्र-महादेशिकविषये 'केशवार्यकृपापात्रम्' (इत्यादावनुसन्धाय तदनु) रामानुजदयापात्रमित्यादिकमनुसन्धीयते। श्रीमन्निगमान्तमहादेशिकविषयकपद्यपठनात् प्राक् तत्परवर्तिनामेतेषां पद्यानुसन्धानं न शिष्टाचारसंमतमिति आक्षेपस्य समाधानं विहितम्। इदमपि पूर्वं ग्रन्थलिप्या मुद्रितमुपर्युक्तवण्शठवैरिगद्येन साकं देवनागरिलिप्यां मुद्रितम्।

**सामान्यनिरुक्तिटिप्पणी**—गदाधरकृतहेत्वाभाससामान्यनिरुक्तिग्रन्थस्य व्याख्यानरूपेयं विद्वन्मण्डले तस्यैव ग्रन्थस्य क्रोडपत्रत्वेनापि व्यवहृता दृश्यते। अद्य यावत् कस्यामपि लिप्याममुद्रिता।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



**सावित्र्यर्थसर्वस्वम्**—ब्राह्मणैरहरहरनुष्ठीयमानसन्ध्यावन्दनकर्मणि गायत्रीमन्त्रजपप्रकरणे जप्यमानगायत्रीमन्त्रप्रतिपाद्यः शिवः, यतो मन्त्रघटकभर्गशब्दः अकारान्तः शिववाचकः। तथा च यः भर्गपदवाचकः शिवः अस्माकं बुद्धिवृत्तीः प्रेरयति आदित्यमण्डलान्तर्वर्ती तमेव ध्यायाम इति पाशुपतमतानुयायिनः संगिरन्ते। तन्मतनिराकरणपूर्वकं बहुभिः प्रमाणैः गायत्रीमन्त्रप्रतिपाद्यः श्रीमन्नारायण एव इति व्यवस्थाप्यते अत्र ग्रन्थे। संदर्भेऽस्मिन् श्रीपराशरभट्टपादैः श्रीमत्कूरेशमिश्रतनयैः विरचितं श्रीरङ्गराजस्तवस्योत्तरशतकस्थं

**'तेजः परं तत्सवितुर्वरेण्यं धाम्ना परेण प्रणवात् सुवर्णम्।**
**त्वां पुण्डरीकेक्षणमामनन्ति श्रीरङ्गनाथं समुपासिषीय॥'** इति

पद्यमपि स्मरणीयम्।

अत्रत्यविशेषाः अस्माभिरभ्यर्थितैः अस्मद्गुरुभिः महामहोपाध्याय-नावल्पाक्कं-शठकोप-रामानुजतातार्यैः सरलया गिरा सङ्क्षेपेण प्रतिपादिता इति विरम्यते। अस्य ग्रन्थस्य एका प्रतिकृतिः अस्मत्पूर्वजैः परिरक्षिता अस्मद्गृहे एवोपलब्धा। तामेवाश्रित्य प्रवृत्तमिदं संपादनकृत्यम्।

शास्त्रशैल्या लिखितस्यास्य ग्रन्थस्य प्रतिपाद्यविषयविशेषान् सरलया रीत्या विलिख्यानुगृहीतवद्भ्यः सकलशास्त्रपारङ्गतेभ्यः श्री एन् एस् रामानुजतातार्यवर्येभ्यः, एतादृशग्रन्थसंपादने अस्मान् प्रोत्साहितवद्भ्यः सुरभारतीसमुपासकेभ्यः एतद्विद्यापीठकुलाधिपतिभ्यः श्रीवादिराजपञ्चमुखीमहाशयेभ्यः, न्यायाद्यनेकतन्त्रनिपुणेभ्यः एतद्विद्यापीठकुलपतिवर्येभ्यः श्रीप्रह्लादाचार्यमहाशयेभ्यश्च हार्दान् धन्यवादान् विनिवेद्य विरमति।

चित्रभानुमेषरामनवमी
२१.०२.२००२

इत्थं बुधजनविधेयः
काणियम्बाक्कं-बालधन्वि (इलयविल्लि)
**गोविन्ददासः**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

# विषयानुक्रमणिका


| | |
|---|---|
| आमुखम् | *iii* |
| प्ररोचना | *v-ix* |
| उपोद्घातः | *xi-xiv* |
| सावित्र्यर्थसर्वस्वम् | १-२८ |
| सावित्र्यर्थसर्वस्वे प्रमाणतयोद्धृतानां ग्रन्थतत्कर्तृवचनानां सूची | २९-४० |


CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्रीः

॥श्रीमते लक्ष्मीहयवदनपरब्रह्मणे नमः ॥

# सावित्र्यर्थसर्वस्वम्

(बालधन्वि-रङ्गाचार्यस्वामिविरचितम्)

**भार्गव्या सह भास्वद्बिम्बे भास्वद् भजामि तद्भर्गः ।**
**भार्गवरचापभञ्जनलीलं फुल्लाब्जलोचनमुदाख्यम् ॥**

इह केचन पाशुपतमतानुयायिनः गायत्र्याः शिवपरत्वं प्रथमान्तशिवप्रसिद्ध-भर्गपदनिर्देशात् मन्यमानाः तस्या इत्थमर्थम् आमनन्ति—यो भर्गः नः अस्माकं धीवृत्तीः प्रेरयति सवितुर्देवस्य मण्डले वर्तमानं तं भर्गं ध्यायाम इति ।

तन्न—एकवाक्यस्थस्य तस्य वाक्यान्तरेणैवान्वये तद्वाक्यघटकपदानां स्वघटितवाक्याघटकपदव्यवहिततया निराकाङ्क्षत्वेन निराकाङ्क्षवाक्यस्य च शाब्दजनकज्ञानाविषयतया 'तत्सवितुः' इत्यारभ्य 'धीमही' त्यन्तस्याप्रामाण्यापत्तेः । न चैकवाक्ये विशकलितानां विशेषणविशेष्यवाचकपदानां पदान्तरव्यवधानेऽपि शाब्दानुरोधेन परस्पराव्यवहितविशेष्यविशेषणवाचकपदघटिताकाङ्क्षाज्ञानस्यैव हेतुतायाः कल्पनीयतया श्रूयमाणपदानुपूर्वीज्ञानस्यार्किंचित्करतया प्रकृते भर्गपदस्य पूर्ववाक्यमध्यवृत्तेः वाक्यान्तरघटकत्वेऽपि नानुपपत्तिरिति वाच्यम् । तद्धर्मपर्याप्ता-वच्छेदकताकविषयताशालिशाब्दत्वावच्छिन्नं प्रति तद्धर्मघटकधर्मप्रतिपादकानां तादृशपदाव्यवहितत्वघटिताकाङ्क्षाज्ञानस्यैव हेतुताया उपगमेन प्रकृते तद्विरहात् पूर्वोक्तानुपपत्तितादवस्थ्यात् । अन्यथा श्रूयमाणवाक्यज्ञानानन्तरम् अन्यादृश-वाक्यं कल्पयित्वा तादृशाकाङ्क्षाज्ञानस्य हेतुत्वस्य कल्पनीयतया तादृशानन्तज्ञा-नकल्पने महागौरवात्, तादृशाकाङ्क्षाज्ञानविरोधिबाधनिश्चयदशायां शाब्दबोधा-नुदयप्रसङ्गाच्च ।

एतेन नानानुपूर्वीकवाक्यस्थले नानाविधाकाङ्क्षाज्ञानस्य हेतुत्वे गौरवात् एकानुपूर्वीप्रकारकज्ञानहेतुत्वमत एव लाघवमित्यपि निरस्तम् । उक्तं च गदाधरेण व्युत्पत्तिवादे राजपुरुषवादे—"दधि पश्यति चैत्र इत्यत्र चैत्रः दधि पश्यति, पश्यति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



चैत्रो दधि, पश्यति दधि चैत्रः इत्यादीनां दधिकर्मकदर्शनकर्तृत्वप्रकारकचैत्रविशेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति पृथक् पृथगेव कारणत्वम्, अन्यैश्च क्रियाकारकपदानामव्यवधानमेवाकाङ्क्षा" इति च ।

यद्यपि नानानुपूर्वीकवाक्यज्ञानानाम् एकधर्मावच्छिन्नशाब्दबोधहेतुत्वे गुरुतरानन्तकारणत्वतदवच्छेदकत्वतदभावतत्प्रतियोगिकत्वानां भिन्नविषयकप्रत्यक्षादौ एकैकवाक्यज्ञानघटितशाब्दसामग्रीप्रतिबन्धकत्वानां च कल्पनया महागौरवम्, तथापि पूर्वमते अनेकज्ञानव्यक्तीनां तत्तन्निष्ठतद्विषयत्वतदभावतज्ज्ञानव्यक्तिनाशप्रागभावतत्प्रतियोगित्वतदवच्छेदकत्वानां च कल्प्यत्वात् साम्यमिति ज्ञेयम् । अधिकम् अग्रे वक्ष्यामः ।

यत्तु मैत्रायणीयोपनिषदि गायत्र्याः पादक्रमेणार्थविवरणावसरे **'तत् सवितुर्वरेण्यम्'** (६-६) इत्यस्य विवरणोत्तरम् **'अथ भर्ग इति यो ह वा अस्मिन् आदित्ये निहितः तारकेऽक्षिणि चैष भर्गाख्यः भाभिर्गतिरस्येति भर्गः भर्जयतीति वैष भर्ग इति रुद्रो ब्रह्मवादिन'** (मै. ३-६-६) इत्यभिधानात् तत्र **रुद्रो भर्ग** इति योजनात् रुद्रस्यैव भर्गपदावयवार्थवत्त्वं प्रतीयत इति निरुक्तविवरणानुरोधात् गायत्रीघटकभर्गपदस्याकारान्तत्वं, प्रथमान्तत्वं, रुद्रपरत्वं भिन्नवाक्यस्य यत्पदेन सामानाधिकरण्यं चावश्यमङ्गीकार्यम् । पूर्ववाक्यस्य यथाश्रुतस्य निराकाङ्क्षत्वेऽपि तत्र योजनावाक्यज्ञानादेव च शाब्दबोधः । श्रुतौ च प्रकृतिप्रत्ययोपसर्गादीनां व्यवधानेऽपि संभूयार्थबोधकत्वदर्शनात् सर्वमुपपन्नम् इति—

तदसमञ्जसम्—**'अथ भर्गो देवस्य धीमहि'** (मै. उ. ६-६) इति प्रतीकमुपादाय **'सविता वै देवः स्थितः योऽस्य भर्गः तं चिन्तयामि'** (मै. उ. 6-6) इति व्याख्यानेन **तत्स्थं भर्गं धीमहि** इत्यर्थस्यैवावगमेन भर्गपदस्य द्वितीयपाद एवान्वयदर्शनेन तस्य वाक्यान्तरेऽन्वयकल्पनस्यायुक्तत्वात् । न च **तत्स्थं भर्गं धीमहि**त्यस्यैव सामञ्जस्ये **यो भर्ग** इति कथनं वाक्यान्तरेण भर्गपदस्यान्वयं दर्शयतीति वाच्यम् ।

**'प्रेरयेत् तस्य यद्भर्गः तद्वरेण्यमुपास्महे'** इति स्मृतिसारूप्येणास्यापि तदुपजीव्यतया तत्समानार्थताया एव युक्तत्वात् । तत्र च यत्पदस्य तृतीयपादस्थस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



सवितृपरत्वं सुस्पष्टम्। न च **यो भर्ग** इति पुमन्तपदस्य दर्शनात् कथमैकरूप्यमिति शङ्क्यम्। भर्गपदस्य तेजः परत्वेऽपि पुल्लिङ्गतया तथा विवरणोपपत्तेः। दृष्टं च पाचकादिशब्दानां यौगिकानामनियतलिङ्गत्वम्।

एवं सावित्र्युपनिषदि गायत्र्यर्थविवरणावसरे **'तस्याः द्वितीयः पादो भर्गमय'** इति **'भुवो भर्गो देवस्य धीमही'** ति **'अग्निर्वै भर्गः आदित्यो वै भर्गः चन्द्रमा वै भर्गः'** इत्यभिधानात् तत्र च भर्गमय इति तेजसि रूढस्य अकारान्तभर्गशब्दस्य **'अग्निर्वै भर्ग'** इत्यनेन पुल्लिङ्गतया दर्शनाच्च। तत्र च भर्गपदस्याग्न्यादिषु प्रत्येकं रूढ्युपगमेऽपि लाघवात् तेजस्त्वावच्छिन्ने रूढेरावश्यकत्वात् तेजःपरत्वे केवल-यौगिकत्ववर्णनं केषांचिदनुपादेयमेव। किं च एतद्वाक्यस्थभर्गपदस्य रुद्रपरत्वं न संभवति। **भाभिर्गतिरस्येति** अवयवव्युत्पत्तिलभ्यस्यालोकानुमेयत्वस्य रुद्रे बाधात् तेजस एव हि लोके आलोकानुमेयत्वं दृष्टम्। स्वीयालोकद्वारा बहिर्व्याप्तिमदर्थकत्वेऽपि तस्य तेजोधर्मत्वमेव। तथोक्तम् **श्रीविष्णुपुराणे**—

**'एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा।'**

इति। एवं भर्जकत्वं रूपपरावृत्तिजनकत्वरूपमिति तस्यापि तेजोधर्मत्वमेव। एवं **'य एषोऽन्तरादित्ये तारकेऽक्षिणि च एष भर्गाख्य'** इति आदित्याक्षिमध्यवर्तिन एवास्मिन् वाक्ये भर्गशब्दवाच्यत्वकथनात् निराकाङ्क्षतया वाक्यान्तरस्थस्य रुद्रपदस्य एतद्वाक्ये योजनाया असंभवाच्च। तथा सति **आमिक्षाधिकरणन्यायविरोधः**। न चादित्यमध्यवर्तिन एव तथात्वावगमेऽपि तन्निर्धारणाय रुद्र इति विशेषवाचकपदेन तदभिधानाय योजना आवश्यकीति वाच्यम्। **'य एषोऽन्तरादित्य'** इत्युपनिषदन्तरप्रसिद्धानुपूर्वीनिर्देशात् अन्तरादित्यविद्याप्रत्यभिज्ञानेन तद्विद्यावेद्यस्य श्रीमतो नारायणस्यैव भर्गपदवाच्यत्वेन प्रतीत्या विशेषजिज्ञासाया एवानुदयेन रुद्रपदयोजनाया अनावश्यकत्वात्। तद्विद्यायां हि पुरुषत्व-पुण्डरीकाक्षत्व-अपहतपाप्मत्वादिधर्मैर्नारायणस्यैव वेद्यत्वं **श्रीसूत्रभाष्य**सिद्धम्। रुद्रस्यानपहतपाप्मत्वं च **'अनपहतपाप्मा व अहमस्मि'** इति श्रुतिसिद्धम्। उपबृंहितं च **महाभारते** शान्तिपर्वणि—

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



'विश्वरूपो महादेवः सर्वमेधे महाक्रतौ ।
जुहाव सर्वभूतानि तथैवात्मानमात्मना ।।
महादेवः सर्वमेधे महात्मा हुत्वाऽऽत्मानं देवदेवो बभूव ।
सर्वान् लोकान् व्याप्य विष्टभ्य कीर्त्या विराजते द्युतिमान्
कृत्तिवासाः ।।'

इति रुद्रस्य कर्मवश्यत्वम् । पुरुषपदस्य भगवत्परत्वं पुरुषसूक्तसिद्धम् । तत्सूक्तस्थेशानशब्दस्य च न रूढ्या शिवपरत्वम् । अमृतत्वस्येति संबन्धिनिर्देशेनामृतत्वप्रतियोगिकेश्वरत्वस्य मोक्षप्रदत्वपर्यवसितस्यैवावयवव्युत्पत्त्या बोधेन रूढ्यनुन्मेषात् । तत्पदरूढ्यर्थविषयकशाब्दबुद्धौ पदान्तरार्थप्रकारता- निरूपिततत्पदावयवार्थनिष्ठविशेष्यताशालिशाब्दसामग्र्याः प्रतिबन्धकत्वात् । अत एव 'एतद्ग्रामस्य स्वामी'त्यादौ सुब्रह्मण्यादौ रूढिज्ञाने सत्यपि ग्रामस्वामिनो बोधः । भगवतः सूर्यमण्डलवृत्तित्वं च

'विद्यासहायवन्तं माम् आदित्यस्थं सनातनम्'

इत्यादिना स्वेनैव भगवता श्वेतद्वीपवासिना प्रत्यपादि ।

किं च अस्मिन्नेव खण्डे 'अथ योऽस्य तामसोंऽशः स रुद्र' इति तमोमूर्तित्वेनाभिहितस्य रुद्रस्य मुमुक्षूपास्यत्वं न संभवतीति मुमुक्षूपास्यदेवताबोधकगायत्रीवेद्यत्वं न संभवति । श्रुतं चात्रैव पूर्वम् 'अथ खलु वा अस्य योऽयं सात्त्विकोंऽशः सोऽसौ विष्णुः' इत्यनेन भगवतः शुद्धसत्त्वमयत्वं,तत एव मुमुक्षूपास्यत्वं च । उपबृंहितश्चायमेवार्थः श्रीविष्णुपुराणे—

'अशुद्धास्ते समस्तास्तु ते हि संसारगोचराः'

इत्यादिना ब्रह्मरुद्रेन्द्रादीनाम् अनुपास्यत्वं प्रतिपाद्य भगवतो वासुदेवस्यैव मुमुक्षूपास्यत्वं प्रतिपादयता भगवता पराशरेण । श्रीमद्भागवतेऽपि—

'सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैः
युक्तः परः पुरुष एक इहास्य धत्ते ।
स्थित्यादये हरिविरिञ्चहरेति संज्ञाः
श्रेयांसि तत्र खलु सत्त्वतनुर्नृणां स्युः ।।'

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



इत्यनेन रुद्रस्य तामसत्वं भगवतो वासुदेवस्य सत्त्वमयत्वं तत एव मोक्षहेतुत्वं चाभ्यधायि।

किं चात्र भर्गपदार्थस्याभेदसंसर्गेण रुद्रे नान्वयः। इति पदेन व्यवधानात्। इतिशब्दसमभिव्याहारे तु इतिपदोत्तरवाक्यस्य पूर्ववाक्यापेक्षया भिन्नवाक्यत्वात्। पूर्ववाक्ये रुद्रपदयोजनायाश्चानन्यगतिकस्थलीयत्वात्। किं तु इतिपदेन पूर्ववाक्यार्थं प्रति निर्दिश्य तत्कर्मकोक्तिक्रियाकर्तृत्वस्य ब्रह्मवादिषु रुद्रे च बोधनं हि तत्र स्वरसम्। न च पूर्वोत्तरवाक्येषु ब्रह्मवादिनामेव ग्रहणात् इह रुद्रस्य पृथक् ग्रहणमनुचितमिति शङ्क्यम्। उक्ति क्रियाकर्तृणां ब्रह्मवादिनां यथा नोक्तिक्रियाकर्मबोधकैतत्पदवाच्यत्वं तथा रुद्रस्यापीति बोधनाय तथाऽभिधानोपपत्तेः। यदि च रुद्रपदस्य पूर्वमेवान्वयः तथा **भाभिः गतिरस्येति भर्गो रुद्र** इत्यत एव योगरूढिशक्त्योःरुद्रे प्रतीतिसंभवेन **'य एषोऽन्तरादित्य'** इत्यारभ्य **'एष भर्गाख्य'** इत्यन्तेन पृथग्रूढिकल्पनस्य वैयर्थ्यं स्यात्। एवं चात्रत्यभर्गपदस्य आदित्यान्तर्वृत्तितेजोमयपुरुषपरत्वनिश्चयात् पूर्वोक्तस्मृत्यानुकूल्याच्च वाक्यान्तरस्थरुद्रपदेन सह नान्वयः। एतेन रुद्रशब्दस्य पूर्ववाक्येऽन्वितत्वमनोरथमात्रेण **'यो देवः सविते'** त्यादिस्मृतिवाक्यानामेतद्विरुद्धार्थानां **विरोधाधिकरणन्याय**विरोधात् **लोकवेदाधिकरणन्याय**विरोधाच्चाप्रामाण्यमिति निरस्तम्।

यत्तु **'अग्निर्वै भर्ग'** इत्यादिश्रुतौ अग्न्यादिपदार्थोद्देशेन भर्गत्वविधानात् नाग्नेः भर्गशब्दवाच्यत्वसिद्धिरिति-तन्न-**'अग्निर्वै भर्ग'** इत्यत्र भर्गपदस्य भर्गपदवाच्यार्थकतायाः द्वितीयपादस्थभर्गपदविवरणानुरोधेनावश्यकतया अग्न्यादिपदस्य मुख्यार्थपरताया एव युक्तत्वात्।

एवं **'तारके' 'अक्ष्णि चे'**ति अक्षिपुरुषबोधात् उपकोसलविद्याप्रत्यभिज्ञानात् तद्विद्यायां च परमात्मनः उपास्यत्वस्योपासितुरर्चिरादिपथेन ब्रह्मप्राप्तेश्चाभिधानात् तादृशाक्षिपुरुषतादात्म्यस्य च रुद्रे बाधात् रुद्रस्य च गायत्रीस्थभर्गपदवाच्यत्वमुक्तश्रुत्या प्रतीयत इति कथनं व्यामोहनमात्रम्। **गतिपादे** हि **छान्दोग्यबृहदारण्यक-कौषीतकीब्राह्मणादि** प्रतिपन्नामर्चिरादिगतिं प्रस्तुत्य तत्र तत्र वैषम्यं च परिहृत्य तया मुख्यब्रह्मप्राप्तिरूपं फलं तदुपायं चाप्रतीकब्रह्मोपासनं भगवान् **बादरायणः** अद्धा सिद्धान्तयांचकार। उक्तोपनिषत्सु प्रतीयमानो ब्रह्मलोकः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



श्रीविष्णुलोक इति तच्चिह्नभूतैः सोमसवनाश्वत्थैरम्मदीयसरोवरविरजानद्यपराजितापुरीन्द्रप्रजापतिद्वारगोपश्रीलक्ष्मीभूमिसाहित्यादिभिश्च पञ्चरात्रादिषु विशदतरं प्रतिपन्नैः स्फुटमवसीयते। **कठवल्ल्यां** तु मोक्षोपायं प्रस्तुत्य प्रथमं प्रणवं प्रशस्य प्रणववाच्यस्योपासनं च **'अशरीरं शरीरेष्वनवस्थेष्ववस्थितं महान्तं विभुमात्मानं मत्त्वा धीरो न शोचति'** (क.उ) इत्यादिना विधाय तत्फलतया **'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्'** (क.उ) इति विष्णुलोकप्राप्तिविधानाच्च परोक्तार्थः द्वापरदेहल्यारोहणमपि नारोहति। तस्मात् यत्र यत्र मोक्षफलायोपासनानि विहितानि तत्रोपास्यं ब्रह्म। तच्च विष्णुः स एव तत्र तत्र शम्भुशिवप्रजापतीन्द्रादिशब्दैः नामरूपव्याकरणश्रुत्या स्वस्मिन्निरूढशक्तिमद्भिरभिधीयते। अयं चार्थः **लिङ्गभूयस्त्वाधिकरणे** (ब्र.सू-३-३-४३) भगवता **भाष्यकृता** निर्धारितः।

अस्यामुपनिषदि चावसाने एतद्विद्योपास्यादित्यो रुद्रभवशिवप्रजापतिब्रह्माग्निविष्णुनारायणादित्यशब्दैरनूदित इति तस्याः गायत्र्याः परमात्मपरत्वमेव न तु तदतिरिक्तदेवतापरत्वम्। परमात्मा च नारायण एवेति

**'परमात्मा च सर्वेषामाधारः परमेश्वरः।**
**विष्णुनामा स देवेषु वेदान्तेषु च गीयते॥'**

इति **पराशरेणोपन्यस्तम्**।

एवं **याज्ञवल्क्यस्मृतौ** यतिधर्मप्रकरणे—

**'ध्यानयोगेन संपश्येत् सूक्ष्म आत्मात्मनि स्थित'** (या.स्मृ.प्रा. ६४) इति मोक्षसाधनतया ब्रह्मोपासनं विधाय तत्प्रवृत्तये च ऐहिकामुष्मिकभोगेष्वल्पास्थिरत्वदोषमूलत्वादिकं संयक् प्रपञ्चयित्वा—

**'हिताहितानामनाड्यस्तासां मध्ये शशिप्रभम्॥'**

(या. स्मृ.प्रा१०८)

**'मण्डलं तस्य मध्यस्थ आत्मा दीप इवाचलः।**
**स ज्ञेयस्तं विदित्वेह पुनरावर्तते न तु॥'**

(या. स्मृ. प्रा.१०९)

इति ध्यानयोगस्य च मोक्षफलमभिधाय, अन्ते च परमपदप्राप्तिरेव मोक्ष इति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



'ऊर्ध्वमेकः स्थितस्तासां यो भित्वा सूर्यमण्डलम्।
ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम्॥'

(या.स्मृ.प्रा. १६७)

इति श्लोकेन दर्शयित्वा, तदुत्तरं चार्चिरादिमार्गेण तत्प्राप्तिमभिदधे। ईदृशयोगविधुरस्य च—

'गीतिज्ञो यदि योगेन नाप्नोति परमं पदम्।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते॥'

(या.स्मृ.प्रा.११६)

इति रुद्रसायुज्यफलमुपदिदेश। तस्मात् मुमुक्षुणा स नोपास्य इति याज्ञवल्क्याशयोऽवगम्यत इति बोध्यम्।

वस्तुस्तु मैत्रायणीयोपनिषदि मोक्षफलाय प्रथमं प्रणववाच्यस्य ब्रह्मणः प्रणवेनोपासनमुक्त्वा अनन्तरं च व्याहृतित्रितयवाच्यत्रैलोक्यशरीरकत्वेन वैश्वानरविद्याक्रमेणोपासनं चाभिधाय तस्यैवानन्तरमपि सूर्यमण्डलान्तर्वर्तिदिव्यतेजोमयविग्रहविशिष्टत्वेन चोपासनं विधीयते। अत्र चादित्यसवित्रादिशब्दाः परमात्मपरा इति उत्तरत्रोक्तम्। तथा च 'तत्सवितुर्वरेण्यमि' त्यस्य 'असौ वा आदित्यस्सविता स वा एवं प्रवरणायात्मकामेनेत्याहुर्ब्रह्मवादिन' इति व्याख्यानात् अयमर्थः पूर्वं सर्वान्तरात्मत्वेनाभिहितः सर्वतत्त्वाश्रयभूतः आदित्यस्तत्पदार्थः। तदभिन्नस्सविता सर्ववस्तुजातस्य जनकः परमात्मा प्रवरणाय प्रकृष्टफलप्रार्थनाय प्रकृष्टफलदानसमर्थ इत्यर्थः। वरेण्यमिति भाव प्रधानो निर्देशः। 'भर्गो देवस्य धीमही'ति प्रतीकमुपादाय 'सविता वै देव' इत्यारभ्य 'ब्रह्मवादिन' इत्यन्तं व्याख्यातम्। देवस्सवितुर्भर्गस्तेजोमयं दिव्यमङ्गलविग्रहमुपास्महे इति तदर्थः। तेजोज्योतिरादिशब्दाः मुमुक्षूपास्यविषयाः भगवद्दिव्यमङ्गलविग्रहपरा एव इति 'ज्योतिर्दर्शनात्' (ब्र. सू.१.३.४१) इति सूत्रव्याख्यावसरे भाष्ये सुस्पष्टम्। 'धियो यो नः' इत्यस्य यथाश्रुत एवार्थ इति बोध्यम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



यद्यपि तदित्यस्य द्वितीयान्तत्वं भारद्वाजसंहितायाम् उक्तम्। अहिर्बुध्न्येन च यच्छब्दं तच्छब्द प्रति निर्देशात् क्लीबः लिङ्गव्यत्ययः छान्दस इत्युक्तम्। एवमगस्त्यविश्वामित्राभ्यां योजनान्तरमपि दर्शितम्। तथापि तत्तदृषिमतभेदात् नानायोजनादर्शात् इहापि प्रकारान्तरमुपदिष्टमिति न चोद्यावकाशः।

किं च अत्रान्ते रुद्रहिरण्यगर्भनारायणादिपदानां सर्वेषां पर्यायत्वेनाभिधानात् अपर्यवसानवृत्त्या साक्षाद्वा परमात्मपरत्वमेवाङ्गीकार्यमिति पररीत्या व्याख्यानेऽपि रुद्रपदस्य परमात्मपरत्वमिति सुधियो विभावयन्तु।

अत्र स्मृतिरत्नाकरोदितानि प्रमाणवचनानि लिख्यन्ते—

वरदराजीये मन्त्रव्याख्याने 'तच्छब्दश्रुतेः यच्छब्दोऽध्याहर्तव्यः। सवितुः जगतां प्रसवितुः "सविता प्रसवानामीशे" इत्यादिश्रुतेः। वरेण्यं 'वृङ् संभक्तौ' ण्यप्रत्ययः। सर्वेषां संभजनीयं भर्गः तेजः। भञ्जनात् भर्गः प्रकाशदानेन जगतः बाह्याभ्यन्तरतमोभञ्जकत्वात्। भर्जनाद्वा कालात्मकतया सकलमकर्मफलपाक-हेतुत्वात्। भरणाद्वा वृष्टिप्रदानेन भूतानां भरणहेतुत्वात्। देवस्य द्योतमानस्य धीमहि चिन्तयामः। 'ध्यै चिन्तयाम्।' देवस्य सवितुः वरेण्यं यत् भर्गः तद्ध्या-यामः, आदित्यमण्डलान्तर्वर्तिनं तेजोमयं पुरुषमनुचिन्तयामः। 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषः अथ य एष एतस्मिन् मण्डलेऽर्चिषि पुरुष' इत्यादिश्रुतेः। धियो यो नः सविता अस्माकं धियः हानोपादानविषयाणि ज्ञानानि प्रचोदयात् प्रचोदयति प्रवर्तयति तत्सवितुर्भर्गः चिन्तयाम' इति।

प्रपञ्चसारे च—"तदिति द्वितीयैकवचनम्। अनेन अखिलवस्तुनः सृष्ट्या-दिकारणं तेजोरूपम् आदित्यमण्डले अभिध्येयं सदानन्दं परब्रह्माभिधीयते" इति।

विश्वामित्रश्च—

'आदित्यमण्डलासीनं रुक्मभाभं पुरुषं परम्।
ध्यायन् जपेत् तदित्येतां निष्कामो मुच्यते द्विजः॥

सप्रभं सत्यमानन्दं हृदये मण्डलेऽपि च।
ध्यायन् जपेत् तदित्येतां निष्कामो मुच्यतेऽचिरात्॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



इत्यादि ।

अत्र मैत्रावरुणीयश्रुतिः—'तत्सवितुर्वरेण्यं ध्रुवमचलममृतं भर्गाख्यं विष्णुसंज्ञं सर्वाधारं धाम' इति ।

योगयाज्ञवल्क्यश्च—

"ईश्वरं पुरुषाख्यं च सत्यधर्माणमच्युतम् ।
भर्गाख्यं विष्णुसंज्ञं च ध्यात्वाऽमृतमुपाश्नुते ॥" इति ।

अगस्त्यसनकस्मृतौ—

'आदित्यमण्डले ध्यायेत् परमात्मानमव्ययम् ।
विष्णुं चतुर्भुजं रक्तपङ्कजासनमध्यगम् ॥

किरीटहारकेयूरनूपुरैरुपशोभितम् ।
श्रीवत्सवनमालाश्रीतुलसीकौस्तुभोज्ज्वलम् ॥

हरिं पीताम्बरधरं शङ्खचक्रगदाधरम् ।
प्रसन्नवदनं रक्तकुण्डलैर्मण्डिताननम् ॥

सर्वरत्नसमायुक्तसर्वाभरणभूषितम् ।
एवं ध्यात्वा जपेत् नित्यं मन्त्रमष्टोत्तरं शतम् ॥

सर्वपापविशुद्धात्मा जितक्रोधो जितेन्द्रियः ।
संसारार्णवमुत्तीर्य परां सिद्धिमवाप्नुयात् ॥" इति ।

एवं गायत्र्या देवतात्वेन आदित्यमण्डलान्तर्वर्तिनः पुरुषोत्तमस्य ध्येयत्वनिर्धारणात् अस्याः देवतान्तरदेवतात्वाशाभिक्षोः राज्ञः किरीटाशेव दुराशा ।

अत्र भरद्वाजः—तदिति द्वितीयैकवचनम् । अनेनाखिलजगदुत्पत्तिस्थितिलयकारणभूतम् उपनिषदि कथ्यमानं निरुपमं तेजः सूर्यमण्डलाभिध्येयं परं ब्रह्माभिधीयते । सवितुरिति षष्ठ्येकवचनम् । 'षूङ् प्राणिप्रसव' इति धातोः एतद्रूपम् । सर्वभूतजातस्य प्रसवितुरित्यर्थः । वरेण्यं वरणीयं प्रार्थनीयं नियमादिभिः अपहतकल्मषैः सत्यन्तं ध्येयम् । भर्गः 'भञ्ज आमर्दने' 'भृजी भर्जने' एतयोर्धात्वोः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



भजतां पापभञ्जनहेतुभूतमित्यर्थः। 'भा दीप्तौ' इत्यस्य धातोर्वा भर्गस्तेज इत्यर्थ इत्यादि।

लौहित्यनीलकण्ठेन च निरुक्तं मन्त्रदीपिकायाम्—

"तच्छब्देन भर्गो विशेष्यते। भर्ग इति तेजः पदार्थकं सवितृसंबन्धि।

देवस्य सवितुस्तेजः वरेण्यं भर्गसंज्ञितम्।
ध्यायेमहीति शब्दोक्तौ धीमहीत्यर्थ उच्यते॥" इति।

एवमन्यान्यपि वाक्यानि सन्ति। तदेव बहुप्रमाणानुसारात् भर्गपदस्य सान्तत्वं तेजःपरतवं च सुस्पष्टम्।

एवं विज्ञानेश्वरेण च मङ्गलश्लोके 'क्लेशकर्म विपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर' इति योगसूत्रानुसारेण

धर्माधर्मौ तद्विपाकास्त्रयोऽपि क्लेशाः पञ्च प्राणिनामायतन्ते।
यस्मिन्नेतैर्नापरामृष्ट ईशः यस्तं वन्दे विष्णुमोङ्काररूपम्॥

इति विष्णोरेव प्रणववाच्यत्वेन सर्वोत्तरत्वं सिद्धान्तितम्।'

एवं च प्रणवार्थस्यैव मैत्रायणीयोपनिषदि तच्छब्दवाच्यत्वेन प्रतिपादनात् तत्समानाधिकरणभर्गपदस्यापि श्रीविष्णुपरत्वमेवेति प्रामाणिकानां निष्कर्षः।

अत्रायं विवेकः—गायत्रीघटकस्य भर्गपदस्य शिवपरत्वे कोशप्रसिद्धिः, गायत्रीविवरणवाक्येषु अकारान्ततया भर्गपदाभिधानं चेति गुणद्वयम्। भर्गः पदस्य तेजःपरत्वे रुद्रपरत्वाभावे च धीमहीति क्रियाकर्मत्वबोधकद्वितीयान्तत्वं प्रथमायाः लक्षणाविरहः, सकारान्ततत्पदघटितानेकस्मृत्यानुगुण्यं यथाश्रुतगायत्रीघटकद्वितीयान्तवरेण्यपदेन सह प्रथमान्तभर्गपदस्य नैराकाङ्क्ष्यविरहः, अकारान्तत्वे सकारान्तत्वे च तेजसि रूढिमत्त्वम् तत एव च गायत्रीविवरणसर्ववाक्यानुगुण्यं चेति षड्गुणाः। रुद्रपरत्वे तु वरेण्यशब्दस्य विशेष्यनिघ्नस्य पुल्लिङ्गत्वे द्वितीयान्तस्य क्लीबत्वे प्रथमान्तस्य वा तस्य प्रथमान्तभर्गपदेन सह आकाङ्क्षा न संभवति। अभेदसंसर्गाविगाहिशाब्दबुद्धौ उत्सर्गतः समानविभक्तिलिङ्गकविशेष्यविशेषणवा-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



चकपदसमभिव्याहारस्यैव हेतुत्वात् प्रकृते आकाङ्क्षान्तरकल्पने च तथाविधाकाङ्क्षाज्ञानस्य हेतुत्वकल्पनमधिकम्। एवं प्रथमान्तभर्गपद-धीमहीतिक्रियापदयोरपि भर्गकर्मकत्वप्रकारकधात्वर्थविशेष्यकशाब्दबुद्धौ हेतुत्वकल्पनमधिकम्। भर्गपदस्य वाक्यान्तरेणान्वयमभ्युपगम्य तमिति पदमध्याहृत्यान्वयबोधोपगमेन च व्यवहितान्वयः। तमिति पदाध्याहारापत्तिश्च। तच्छब्दस्य लिङ्गव्यत्ययेन बाधकत्वकल्पने च व्यत्ययकल्पनमेव दोषः।

यदि च यथाश्रुतवाक्यतः अध्याहारविभक्तिव्यत्ययादिकमन्तरैव शाब्दबोधे संभवति आग्रहादिना अर्थान्तरं वर्ण्यते तदा तुल्ययुक्त्या भर्गपदस्य षष्ठ्यन्तस्य छान्दसं स्वादेशमभ्युपगम्य सवितृमण्डलमध्यवृत्तेः देवस्य रुद्रस्य वरेण्यमुपास्यं ब्रह्म धीमहीत्यन्वयबोधपरत्वमपि स्यात्। उक्तं च शान्तिपर्वणि मोक्षधर्मे शिववरेण्यत्वं भगवतः—

'प्रसादयामास भवो देवं नारायणं तदा।
शरणं च जगामाद्यं वरेण्यं वरदं प्रभुम्॥' इति।

हरिवंशे च कैलासयात्रायां श्रीमता रुद्रेण—

"हरिरेकः सदा ध्येयः भवद्भिः सत्त्वमास्थितैः।"

इत्यारभ्य—उपास्योऽयं सदा विप्रा उपायोऽस्मि हरेस्स्मृतौ।'इति। अयं श्लोकः शाङ्करसहस्रनामभाष्ये उदाहृतः। श्रीमद्भागवते चायमर्थो बहुधा प्रपञ्चितः। तस्मात् परमार्थधिया प्रमाणवशंवदेन अध्याहारादिक्लेशमसहमान एवार्थः परिग्राह्यः।

अत एव चारण्यके प्रथमप्रश्ने एकादशानुवाके 'पवित्रवन्त' इत्यत्र गायत्रीव्याख्यावसरे 'वरेण्यम् वरणीयं श्रेष्ठम् सवितुः प्रेरकस्य सूर्यस्य तत् प्रसिद्धम् भर्गः तेजः धीमहि ध्यायामः। यः सविता नः अस्माकम् धियः बुद्धिः प्रचोदयात् प्रकर्षेण प्रेरयति तस्य सवितुरिति पूर्वत्रान्वयः' इति विद्यारण्यैः भाषितमिति। एवमेव भट्टभास्करीयेऽपि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



वस्तुतस्तु 'चैत्रो दधि पश्यति' 'पश्यति चैत्रो दधी'त्यादिनानानुपूर्वीकवाक्यज्ञानानां न भिन्नभिन्नरूपेण कारणता, न वा तत्तद्वाक्यज्ञानानन्तरकल्पितयोजनावाक्यज्ञानत्वेन, गौरवात्। किं तु 'चैत्रो दधि पश्यती'त्यादौ नानानुपूर्वीकवाक्यज्ञानानामनुगतरूपेण हेतुत्वम्। तच्च चैत्र इति प्रथमान्तपदविशिष्टं यत् द्वितीयान्तदधिपदम्, तद्विशिष्टाख्यातान्तपश्यतीत्यादिपदज्ञानत्वम्। कार्यतावच्छेदकं तु चैत्रनिष्ठविशेष्यतानिरूपितदधित्वविशिष्टपर्याप्तावच्छेदकतानिरूपितकर्मत्वनिष्ठावच्छेदकतानिरूपितदर्शननिष्ठावच्छेदकतानिरूपिताख्याताऽर्थकृतिनिष्ठप्रकारताशालिशाब्दत्वम्। दधित्वविशिष्टपर्याप्तत्वस्यावच्छेदकत्वे विशेषणत्वात् 'चैत्रः सुन्दरं दधि पश्यति' इत्यादावुक्ताकाङ्क्षाविरहेऽपि न क्षतिः। 'चैत्रः दधि स्तोकं पश्यति' इत्यादौ व्यभिचारवारणाय च दर्शनत्वविशिष्टपर्याप्तत्वमपि तन्निष्ठावच्छेदकत्वे देयम्। एवमन्यत्रापि यथासंभवमूह्यम्।

वैशिष्ट्यं च स्वनिष्ठविशेष्यतानिरूपिता या दधिकर्मकदर्शनकृतिप्रकारतानिरूपितचैत्रविशेष्यताशालिशाब्दबोधत्वावच्छिन्नजनकत्वनिष्ठप्रकारता वक्तृतात्पर्यनिरूपिता तद्विशिष्टत्वसंसर्गेण। तद्वैशिष्ट्यं च स्वनिरूपितविशेष्यताश्रयत्वस्वविशिष्टपदविशिष्टान्यत्वोभयसंसर्गेण। पदे स्ववैशिष्ट्यं च स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसंसर्गेण। स्वनिष्ठावच्छेदकता तु स्वनिरूपितविशेष्यताश्रयत्वसंसर्गेण। पदवैशिष्ट्यं च स्वाव्यवहितत्वसंसर्गेण। वक्तृतात्पर्यं च 'चैत्रो दधि पश्यति' इति पदसमुदायः दधिकर्मकदर्शनकर्तृचैत्रबोधं जनयतु इत्याकारकमत्र निवेश्यम्। तात्पर्यस्यापि आकाङ्क्षाघटकत्वं ग्रन्थकृद्भिरुक्तम्। अन्यथा 'अयमेति राज्ञः पुत्रः पुरुषोऽपसार्यताम्' इत्यादौ राज्ञः पुत्रेणान्वयबोधतात्पर्ये सति पुरुषेणान्वयबोधस्य दुर्वारत्वात् संसर्गकोटौ स्वविशिष्टपदविशिष्टान्यत्वनिवेशाच्च।' गिरिर्भुक्तम् अग्निमान् देवदत्तेन' इत्यादौ गिरिपदाग्निमत्पदयोराकाङ्क्षाव्युदासः। एवं च 'चैत्रो दधि पश्यति' इत्यत्र विशेष्यविशेषणवाचकपदानां वैपरीत्येऽपि उक्तरूपस्यानुगतत्वादेकरूपेणैव हेतुता निराबाधा।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



न चैवं 'भूतलं घटवत्' 'पर्वतो वह्निमान्' इत्यादौ क्रमिकोच्चारणे घटवत्पदस्य भूतलपदनिष्ठविशेष्यतानिरूपितप्रकारतानिरूपितविशेष्यताशून्यपर्वतपदाव्यवहितत्वेन तद्विशिष्टान्यत्वाभावात् आकाङ्क्षा न स्यादिति वाच्यम्। स्वनिष्ठविशेष्यतानिरूपितप्रकारतावैशिष्ट्यं हि पदे स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वस्वनिरूपितविशेष्यताशालिपदप्रागभावाधिकरणत्वोभयसंबन्धेन। एवं च प्रकृते पर्वतपदस्य भूतलपदनिष्ठविशेष्यतानिरूपितप्रकारतावैशिष्ट्यनिरुक्तसंसर्गद्वयेन नास्तीति न तदादाय दोषः। न चैवमपि 'भूतले घटः पश्यति चैत्र' इति क्रमेणोक्तौ चैत्रपदवैशिष्ट्यस्य पश्यतिपदे असंभवात् तयोरेकवाक्यत्वं न स्यात्। वाक्यान्तरस्थस्य घटपदस्य निरुक्तसंसर्गद्वयेन चैत्रपदविशिष्टतया अव्यवहितत्वसंसर्गेण तद्विशिष्टत्वस्य पश्यतिपदे सत्त्वादिति वाच्यम्। प्रकारतावैशिष्ट्यशरीरे स्वनिरूपितविशेष्यताश्रयपदध्वंसाधिकरणस्यापि पदे निवेशनीयत्वात् निरुक्तदोषासंभवात्।

न च 'नीलो घट' इत्यादौ घटपदनीलपदयोराकाङ्क्षा न स्यात्। निरुक्तसंसर्गत्रयेण घटपदनिष्ठविशेष्यतानिरूपितप्रकारतावैशिष्ट्यस्य कस्मिन्नपि पदे विरहात् तादृशप्रकारताविशिष्टान्यत्वस्य नीलपदे दुरुपपादत्वादिति वाच्यम्। पदविशिष्टान्यत्वस्थाने तादृशपदविशिष्टत्वसंबन्धावच्छिन्नप्रकारतात्यन्ताभावस्य निवेशनानतिप्रसङ्गात्। शाब्दबोधे तात्पर्यज्ञानस्य पृथक् हेतुत्वाकल्पनाच्च लाघवमस्मन्मते निराबाधम्। ईदृशाकाङ्क्षाविरोध्यभावघटिताप्रामाण्यग्रहाभावानामेवावच्छेदकत्वमिति एकैकविधानुपूर्वीकज्ञाने तत्तदप्रामाण्यग्रहसत्त्वेऽपि न शाब्दबोधानुपपत्तिः। न चानुषङ्गस्थले पूर्ववाक्यस्थपदस्य द्वितीयवाक्यस्थपदे उक्तसंसर्गेणासंभवादसंगतिः। मध्ये पूर्ववाक्यमात्रघटकस्यापि पदस्य सत्त्वेन तेन व्यवधानादिति वाच्यम्। स्वनिरूपितविशेष्यताश्रयत्व-स्वभिन्नकिञ्चिच्छाब्दजनकत्वप्रकारतानिरूपितविशेष्यताशून्यत्वोभयसंबन्धेन स्वनिष्ठविशेष्यतानिरूपितप्रकारतावैशिष्ट्यस्य स्वध्वंसप्रागभावप्रतियोगिपदे निवेशात् सामञ्जस्यात्। अनुषङ्गादिस्थले अनुषज्यमानपदादेः स्वनिरूपितविशेष्यताश्रयत्वेऽपि तदन्यकिंचिच्छाब्दजनकत्वप्रकारतानिरूपिततात्पर्यनिरूपितविशेष्यताशालित्वेन तच्छून्य-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



त्वाभावात् निरुक्तसंसर्गेण तादृशप्रकारताविशिष्टं पदान्तरमेवेति तद्ध्वंसाधिकरणत्वस्य वाक्यान्तरीयपदे विरहादनुपपत्त्यभावात्।

नन्वेवमपि 'नीलपर्वतो भुक्तम् अग्निमान् देवदत्तेन' इत्यादावाकाङ्क्षापत्तिः। तत्र स्वनिष्ठनीलपर्वतपदवह्निमत्पदोभयत्वावच्छिन्नविशेष्यतानिरूपितवह्निमत्पर्वतविषयकशाब्दत्वावच्छिन्नजनकत्वनिष्ठप्रकारतायाः स्वभिन्नकिंचिच्छाब्दबोधजनकत्वप्रकारतानिरूपिततात्पर्यनिरूपितविशेष्यताशून्यत्वसंसर्गेण नीलपर्वतपदे नीलप्रकारकपर्वतविशेष्यकशाब्दबोधजनकत्वप्रकारकतात्पर्यविशेष्यविरहात् पदान्तरस्यैव तादृशतया तत्प्रतियोगिकध्वंसवत्त्वस्य भुक्तपदे विरहात् तद्व्यवधानस्याकिंचित्करत्वादिति चेत्—न प्रकारतायां स्वभिन्नत्वं विहाय स्वानवच्छेदकावच्छिन्नत्वस्य स्वावच्छेदकतापर्याप्त्यधिकरणधर्माव्यापकधर्मावच्छिन्नत्वस्य वा प्रक्षेपणोक्तदोषासंभवात्।

अथैवं 'चैत्रो दधि पश्यति' इति वाक्यानां चैत्रपदविशिष्टदधिपदविशिष्टपश्यतिपदनिश्चयत्वेनेव विनिगमकाभावेन पश्यतिपदविशिष्टदधिपदाविशिष्टचैत्रपदनिश्चयत्वेनापि हेतुत्वसंभवात् महागौरवमिति प्रातिस्विकरूपेण हेतुत्वम्, अत एव लाघवम्। न च पृथग्धेतुत्वमते कार्यतावच्छेदकगर्भे अव्यवहितोत्तरत्वस्य निवेश्यतया गौरवमिति वाच्यम्। अनुगतरूपेण हेतुत्वमतेऽपि पर्यायपदान्तरघटितवाक्यजन्यशाब्दबोधे व्यभिचारवारणाय तन्मतेऽपि तस्य निवेशनीयतया तदंशे साम्यात् उक्तानुगतरूपस्य नानावाक्यसाधारण्येऽपि अनुगतरूपान्तरेण ज्ञानदशायाम् एतज्ज्ञानस्यासंभवात् व्यभिचारवारणायाव्यवहितोत्तरत्वस्य कार्यतावच्छेदक ध्रौव्याच्च इति चेत्—

मैवम्—शाब्दबोधे उद्देश्यविधेयवाचकपदयोः पौर्वापर्यज्ञानस्य आकाङ्क्षाज्ञानत्वेन हेतुतायाः तान्त्रिकैरङ्गीकारात् तस्य चाव्यवहितोत्तरत्वसंसर्गावच्छिन्नोद्देश्यवाचकपदनिष्ठप्रकारतानिरूपितविधेयवाचकपदनिष्ठविशेष्यताशालिज्ञानपर्यवसिततया अन्यादृशाकाङ्क्षाज्ञानानां तन्मते अहेतुत्ववत् उक्तानुगतरूपेण हेतुत्वेऽपि तादृशविशेषणविशेष्यभावापरित्यागात् अन्यादृशाकाङ्क्षाज्ञानानां न हेतुत्वम्। अव्यवहितोत्तरत्वस्थाने संसर्गान्तरनिवेशाच्च योजनामत इव न भ्रमात्म-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



कज्ञानस्य हेतुता लाघवं चेति ध्येयम्। उक्तं च गदाधरेण—**'उपनयेन योजनयैव पक्षे अयंपदार्थे साध्यव्याप्यवत्त्वस्य बोधनात् तात्पर्यसत्त्वे वादिवाक्ये योजनायाः दूषणानर्हत्वात्'** (अव. पृ.३१) इत्यादिना योजनाज्ञानस्य हेतुत्वम्। **'यद्वृत्तयोगः प्राथम्यम्'** इत्याद्युद्देश्यलक्षणमिति प्राचीनगाथा चात्र मानम्।

यद्यपि **सत्प्रतिपक्षदीधित्युक्तरीत्या** स्मृतेर्विपरीतनिश्चयाबाध्यत्वमभ्युपगम्य स्मृतिरूपाकाङ्क्षाज्ञानं बाधधीदशायामपि परिष्कर्तुं शक्यम्, तथापि तादृशस्मृतिमूलं ज्ञानं मानसादिरूपं बाधनिश्चयबाध्यमेवेति तस्यासंभव एवेति मन्तव्यम्। अत एव तादृशयत्किंचिच्छाब्दबोधं प्रति यादृशयादृशधर्मप्रकारकज्ञानत्वेन शब्दज्ञानस्य कारणता, प्रत्येकं तत्तद्धर्मावच्छिन्नवाक्यसमुदायत्वं न्यायत्वमिति न्यायलक्षणस्य सामञ्जस्यम्। अन्यथा उपनये योजनया अयंपदाव्यवहितोत्तरतया पदज्ञानत्वेन हेतुतायाः वाच्यतया तादृशरूपस्य चोपनयवाक्ये कुत्राप्यभावात् असंभवप्रसङ्गात्। एवं **दीधितिकृदुक्तोपनयादिलक्षणस्यापि** सामञ्जस्यं बोध्यम्।

न चैवमपि 'पर्वतो वह्निमान् महानसीयवह्निमांश्च' इत्यत्र महानसीयवह्निमतोऽपि तादात्म्येन पर्वते भानात् पर्वतपदस्य च स्वनिष्ठविशेष्यतानिरूपिता या महानसीयवह्निमत्पर्वतविषयकशाब्दजनकत्वनिष्ठा तात्पर्यनिरूपिता प्रकारता स्वनिरूपितविशेष्यताश्रयत्वस्वावच्छेदकधर्माव्यापकधर्मावच्छिन्ना या शाब्दजनकत्वप्रकारता, तन्निरूपितवक्तृतात्पर्यनिरूपितविशेष्यताशून्यत्वोभयसंबन्धेन तत्संबन्धित्वेन तद्ध्वंसाधिकरणस्य च वह्निमत्पदे सत्त्वात् तद्व्यवहितत्वाच्च महानसीयवह्निमत्पदस्य निराकाङ्क्षत्वापत्तिरिति वाच्यम्। तत्र विधेयताभेदात् वाक्यभेदेऽपि वह्निमत्तादात्म्यमहानसीयवह्निमत्तादात्म्योभयवत्पर्वतविषयकबोधजनकत्वप्रकारकतादृशसमुदायविशेष्यकतात्पर्यस्यैव तादृशवाक्यप्रयोजकत्वोपगमेनादोषात्। न चैवमपि निगमनेऽनुषङ्गपक्षे तन्निश्चयस्य अयंपदविशिष्ट-तस्मादिति-पदविशिष्टवह्निमत्पर्वतविषयकत्वेनैव हेतुत्वस्य वाच्यतया ईदृशरूपस्य तथा चायमित्युपनयोत्तरं यत्र भूतलं तस्मात् वह्निमानिति निगमनाभासः तत्राप्यक्षतेः अयं तस्मात् वह्निमानिति शाब्दबोधापत्तेः। अयंपदवैशिष्ट्यस्य तस्मादिति पदे सत्त्वेन

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



तद्घटिताकाङ्क्षाया अव्याहतत्वात्। भूतलपदेन तस्य व्यवधानेऽपि तस्याकिंचित्करत्वात्। अयंपदनिष्ठविशेष्यतानिरूपितप्रकारतायाः स्वनिरूपितविशेष्यतासंसर्गेण अयंपदे संभवेऽपि स्वावच्छेदकतापर्याप्त्याधिकरणधर्माव्यापकधर्मावच्छिन्ना या उपनयार्थविषयकशाब्दत्वावच्छिन्नजनकत्वनिष्ठतात्पर्यनिरूपिता प्रकारता तन्निरूपितविशेष्यतासत्त्वेन तच्छून्यत्वस्याभावेन तादृशोभयसंबन्धेन तत्तत्प्रकारतावि‌शिष्टं यत् तस्मादिति पदं तद्ध्वंसाधिकरणत्वस्य भूतलपदे विरहात् तादृशं पदान्तरमेवेति तच्छून्यत्वस्य तस्मादिति पदेऽक्षतत्वात् इति वाच्यम्। निगमनस्य अयं तस्मात् वह्निमानित्याकारकत्वेन तस्य निरुक्तगुरुरूपेण हेतुत्वस्य अनुचिततया यथाश्रुतानुपूर्वीज्ञानत्वेनैव हेतुतया भूतलपदव्यवहितस्य उक्तवाक्यस्य निराकाङ्क्षत्वधौव्यात्। न च तस्मात् नेतराणीत्यत्र तस्मादितराणि नेत्यपि निगमनसंभवेन तत्रोक्तानुगतरूपेणैव हेतुत्वस्य वाच्यतयोक्तदोषापत्तिरिति वाच्यम्। अयं तस्मात् इति पदयोः सर्वत्राव्यवधाननैव प्रयोगात् तदंशे अव्यवहितोत्तरत्वघटिताकाङ्क्षाज्ञानहेतुत्वस्योचितत्वात्।

न च 'धूमवानयम्' 'तस्मात् वह्निमान्' इति यत्र वाक्यद्वयं तत्र तस्मादित्यस्य अयंपदाव्यवहितोत्तरत्वमविवक्षितम्। अयं वह्निमान् तस्मादित्यपि प्रयोगसंभवात्। निगमनवाक्य एव तथा नियमात्। तथा च अयंपद-तस्मादिति पदयोरपि निरुक्तप्रकारताघटितवैशिष्ट्यमेवाकाङ्क्षाशरीरे निवेश्यमिति निरुक्तदोषानुद्धार एवेति वाच्यम्। आनुषङ्गिकपदस्य पदान्तरव्यवधानस्याकिंचित्करत्वेन धूमवानयं भूतलं तस्मादिति वाक्येऽपि निरुक्ताकाङ्क्षासत्त्वे तन्निश्चयत्वेन हेतुत्वे बाधकाभावात्। न चैवं तथा चायमित्युपनयोत्तरं भूतलं तस्मात् वह्निमानिति यत्र प्रयोगः तादृशसमुदायस्यापि न्यायत्वापत्तिः। तत्रापि निरुक्ताकाङ्क्षासत्त्वादिति वाच्यम्। उचितानुपूर्वीकत्वविरहादेव तादृशसमुदायातिप्रसङ्गाभावात्।

अथैवमपि गिरिर्भुक्तम् अग्निमान् देवदत्तेन इत्यादौ निरुक्तपदचतुष्टयं वाक्यार्थद्वयविषयकसमूहालम्बनबोधं जनयत्विति तात्पर्ये सति वह्निमत्पदे गिरिपदनिष्ठविशेष्यतानिरूपितप्रकारतावैशिष्ट्यमव्याहतम्। व्यवधायकभुक्तपदस्य प्रकृतप्रकारतानिरूपितविशेष्यताशालित्वेन तच्छून्यपदान्तरव्यवधानराहित्यस्याक्ष-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



तेरिति वाच्यम्। तद्धर्मावच्छिन्नोद्देश्यतानिरूपिततद्धर्मावच्छिन्नविधेयताशालि-शाब्दबुद्धौ तद्धर्मावच्छिन्नवाचकपदपर्याप्तसमुदायत्वावच्छिन्नविशेष्यकबोधजन-कत्वप्रकारकतात्पर्यस्यैव प्रयोजकतया तस्यैवाकाङ्क्षाशरीरे प्रवेशेनोक्तपदचतुष्ट-यविषयकतात्पर्यस्यातथात्वेनोक्तातिप्रसङ्गानवकाशात्। न चैवमपि गिरिरग्निमा-निति पदद्वयं पर्वतो वह्निमान् इति बोधं जनयतु, निरुक्तपदचतुष्टयं च निरुक्तवाक्यार्थद्वयविषयकबोधं जनयत्विति समूहालम्बनेच्छामादाय तद्दोष इति वाच्यम्। पर्वतो वह्निमान् इत्यादिशाब्दबुद्धित्वावच्छिन्नं प्रति तादृशशाब्दत्वाव-च्छिन्नजनकतात्वावच्छिन्नप्रकारतानिरूपिता या पर्वतो वह्निमानिति समुदायत्वाव-च्छिन्नपर्वतपदनिष्ठा वक्तृतात्पर्यीया विशेष्यता तद्विशिष्टवह्निमत्पदत्वमेवा-काङ्क्षा। वैशिष्ट्यं च स्वनिरूपितप्रकारताविशिष्टत्व- संसर्गेण। प्रकारतावैशिष्ट्यं च स्वनिरूपितविशेष्यताश्रयत्वस्वविशिष्टपदविशिष्टान्यत्वोभयसंबन्धेन। पदे स्ववैशिष्ट्यं च स्वनिरूपितविशेष्यताशून्यत्वस्वविशिष्टपदप्रागभावाधिकरणत्व-स्वविशिष्टपदध्वंसाधिकरणत्वैतत्त्रितयसंबन्धेन। पदे स्ववैशिष्ट्यं च स्वनिरूपित-विशेष्यताश्रयत्व-स्वनिरूपितबोधनिष्ठावच्छेदकतानिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्माव्याप- कधर्मावच्छिन्ना या बोधनिष्ठावच्छेदकता तन्निरूपितजनकत्व-प्रकारता तन्निरूपितविशेष्यताशून्यत्वोभयसंबन्धेन विशेष्यताव्यक्तेः तद्व्यक्ति-त्वेन प्रकारकोटौ निवेशात् न गौरवम्।

न च एकपर्वतपदनिष्ठविशेष्यतायाः तद्व्यक्तित्वेन निवेशे तद्वैशिष्ट्यस्य तत्पर्वतपदसमभिव्याहृततद्वह्निमत्पद एव सत्त्वेन पर्वतो वह्निमानिति निखिलवाक्य-साधारण्यासंभवात्। अनुगतरूपेण कारणत्वासंभव इति वाच्यम्। स्वनिरूपितप्र-कारतास्थाने स्वावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नविशेष्यतानिरूपितत्वस्य प्रकारतायां निवेशेनोक्तदोषानवकाशात्। पर्वतपदवह्निमत्पदपर्याप्तसमुदायत्वाव-च्छिन्नपर्वतपदनिष्ठविशेष्यतासामान्यस्यैव स्वावच्छेदकतापर्याप्त्यधिकरणधर्मप-र्याप्तावच्छेदकताकविशेष्यतात्वेन संग्रहसंभवात्। न च पर्वतपदनिष्ठविशेष्यता-व्यक्तीनां व्यक्तित्वेन नानात्वात् विनिगमनाविरहेण नानाविशेष्यताव्यक्तीनां तत्तद्व्यक्तित्वेन प्रकारकोटौ निवेशे तत्तद्विशेष्यताव्यक्तिघटिताकाङ्क्षाज्ञानकार-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



णतानां नानात्वापत्त्या महागौरवमिति वाच्यम्। समनियतनानाधर्मावच्छिन्नकारणतानामभेदात् उक्तगौरवानवकाशात् स्वावच्छेदकधर्माव्यापकत्वं परित्यज्य स्वनिरूपितबोधनिष्ठावच्छेदकतानिरूपितावच्छेदकतापर्याप्त्यधिकरणधर्माव्यापकत्वस्य धर्मे निवेशाच्च नीलपर्वतो भुक्तम् अग्निमान् देवदत्तेनेत्यादौ न पूर्वोक्तदोषः। पर्वतो वह्निमान् महानसीयवह्निमांश्चेत्यादौ पर्वतपदस्यानुषङ्गेऽपि नानुपपत्तिः। महानसीयवह्निमत्पर्वतविषयकशाब्दत्वाव्यापकं यद्वह्नित्वपर्याप्तावच्छेदकताकप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिशाब्दत्वं तदवच्छिन्नजन्यतानिरूपितजनकतात्वावच्छिन्नायाः तात्पर्यीयप्रकारतायाः स्वनिरूपितविशेष्यतासंसर्गेण पर्वतपदे सत्त्वेन तच्छून्यत्वविरहेण निरुक्तोभयसंबन्धेन तादृशप्रकारताविशिष्टं महानसीयवह्निमत्पदमेवेति तद्बुद्धंसाधिकरणत्वस्य वह्निमत्पदे विरहेण तद्बुद्धयवहितत्वस्य महानसीयवह्निमत्पदे सत्त्वेऽपि निरुक्ताकाङ्क्षाया अव्याहतत्वात् इति।

एवं च प्रकृते भर्गपदस्य तत्सवितुरिति वाक्याघटकत्वात् तद्वाक्यमध्यनिविष्टत्वेन च तस्य निरुक्तसंसर्गत्रयेण तद्वाक्यघटककर्मवाचकपदनिष्ठविशेष्यतानिरूपितप्रकारताविशिष्टत्वेन तद्बुद्धयवहितत्वस्य क्रियापदे सत्त्वात् निरुक्तवाक्यस्थस्य भर्गपदस्य वाक्यान्तरमात्रघटकत्वे च निराकाङ्क्षत्वं वज्रलेपायितम्। एवमुत्तरवाक्यस्यापि देवस्येति पदेन भर्गपदोत्तरेण व्यवधानात् तस्यापि निराकाङ्क्षत्वमवर्जनीयमिति बोध्यम्। एवं चैकवाक्यत्वानुरोधात् क्लीबेन कर्मवाचिना तच्छब्देन सामानाधिकरण्याच्च धीमहीति क्रियाकर्मवाचिनो भर्गपदस्य द्वितीयान्तत्वमावश्यकम्। तत्र 'सुपां सुलुक्' इति सूत्रानुशिष्टद्वितीयास्थानीयप्रथमान्तत्वकल्पनापेक्षया सान्तत्वमेव तस्योचितम्। सान्तस्य तस्य तेजसि रूढिश्च 'भर्गसी रेत आलोकौ' इति वैजयन्तीसिद्धा। सकारान्तत्वं क्लीबत्वं कर्मवाचकत्वं च—

'यो देवः सवितास्माकं धियो धर्मादिगोचराः।
प्रेरयेत् तस्य यद्भर्गः तद्वरेण्यमुपास्महे॥'

इति अगस्त्यविश्वामित्रौ सस्मरतुः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



यत्तु भर्गपदस्य तृतीयपाद एवान्वयं दर्शयन्ती—

'देवस्य सवितुर्मध्ये यो भर्गो नो धियः क्रमात्।
पुत्रोदयात् तं वरेण्यं धीमहीत्यन्वयक्रमः॥'

इति योगयाज्ञवल्क्यस्मृतिः। सा च मैत्रायणीयश्रुतिविवरणविरोधात् अनेकस्मृतिविरोधाच्च तदानुगुण्याय यथाकथंचित् नेया। तत्र च यच्छब्दो भर्गपर इति सूचयितुं **देवस्य सवितुर्मध्ये यो भर्ग** इत्यन्तमुक्तम्। **देवस्य सवितुर्मध्ये** इत्यस्य **तं वरेण्यमिति** तच्छब्देनान्वयः पुल्लिङ्गद्वितीयान्ततच्छब्देन विवरणं च **सावित्र्युपनिषत्सिद्धतेजोनिरूढभर्गपदानुरोधात्**। भर्गपदं तु द्वितीयार्थलाक्षणिकप्रथमान्तं वा द्वितीयादेशप्रथमान्तं वा; न तु पुमन्तद्वितीयान्ततत्पदस्याप्यध्याहारः, वैयर्थ्यात्। तत्पदं वा निर्विभक्तिकं तमित्यनेन विवृतम्। सवितृशब्देन समस्तं वा **मैत्रायणीयाद्यनुरोधात्**।

'उक्तो मैत्रायणीयश्रुतिगिरिसवितृब्रह्मसंबन्धिभर्गः
ध्येयो भर्गोऽस्य भाभिर्गतिरिति कथितस्तामसांशो हि रुद्रः।

एवं तत्त्वेऽत्र सावित्र्यभिहितमवदन् भर्गशब्दात् गिरीशं
तच्चार्थात् प्राङ्निरस्तं पुनरपि विशदीकुर्महे तत्र दोषान्॥'

यच्चोक्तं **शिवतत्त्वविवेके 'यदेष रुद्रो भर्गाख्य'** इति **मैत्रायणीयवचनात्** गायत्रीस्थभर्गशब्दस्य शिवपरत्वम् इति तन्न—परिदृश्यमानेषु उपनिषत्कोशेषु मुद्रितेषु तत्पाठादर्शनात् **'एष भर्गाख्य'** इत्येव पाठः।

यदपि सवितृशब्दस्य षष्ठ्यन्तस्य अव्यवहितेन वरेण्यशब्देनैवान्वयः। न तु भर्गशब्देन व्यवधानात् इति-तन्न-अस्यामेवोपनिषदि **'भर्गो देवस्य धीमही'** ति द्वितीयपादव्याख्याने **'सविता वै देव'** इत्यादिना **'योऽस्य भर्गस्तं संचिन्तयामः इत्याहुः ब्रह्मवादिन'** इत्यन्तेन तत्पदार्थस्य भर्गशब्दार्थेनैवान्वयकथनात् **'यो देवः सवितास्माकम्'** इति स्मृतौ च **'प्रेरयेत् तस्य यद्भर्गः'** इति भर्गःपदार्थेनैव षष्ठ्यन्तसवितृपदार्थस्यान्वयदर्शनात् भवदभिमतयोगयाज्ञवल्क्यस्मृतावपि देवस्य सवितुर्मध्ये **'यो भर्ग'** इत्यनेन सवितृवृत्तित्वस्य भर्ग एव कथनाच्च।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



एतेन **'तदक्षरं तत्सवितुर्वरेण्यम्'** इत्यादिश्रुत्यन्तरसारूप्यकथनमपि परास्तम्। वचनविरोधे सति तस्याकिंचित्करत्वात्। सवितुर्वरेण्यस्य चित्रामित्यादितैत्तिरीयश्रुतिलेखनमपि प्रतीपं भवत्पक्षस्य। तत्र सामानाधिकरण्येन सवितुर्वरेण्येऽभेदेनैवान्वयात्। एतेन सवितृशब्दस्य ब्रह्मपरत्वं वा सवितृपरत्वं वेति विकल्प्य दूषणाभिधानं निस्सारम्।

किं च सवितुर्देवस्येति सवितृशब्दस्य देवशब्देन सामानाधिकरण्येनान्वयात् तस्य वरेण्यपदार्थेऽन्वयाभिधानममूलम्।

एतेन अव्यवहितत्वात् वरेण्यशब्देनान्वय इत्यपि निरस्तम्। सति सामानाधिकरण्येनान्वये वैयधिकरणेनान्वयस्यायुक्तत्वात्। **निषादस्थपतिन्याय**विरोधात् देवस्येति पदं तु न वरेण्यपदाव्यवहितम्। किं तु भर्गपदेनैवेति अव्यवहितपदार्थ एव पदार्थान्वय इति परोक्तिः तत्पक्षमेव प्रतिक्षिपति। यद्यपि देवपदार्थस्य सवितृपदार्थे विशेषणत्वं उक्तस्मृत्या प्रतीयत इति अपि वक्तुमुचितम् तथापि सवितृशब्दार्थस्य भर्गपदार्थेनैवान्वयः उक्तप्रमाणैरवगम्यत इति बोध्यम्।

यच्चोक्तं **मैत्रायणीयशाखायां** प्रथमपादव्याख्यायां सवितुर्वरेण्यमित्यन्वयदर्शनात् तत्रैवान्वयो युक्त इति-तदपि न **'असौ वा आदित्यः सविता स वा एवं प्रवरणाय'** इति वाक्येन सवितृवरेण्यशब्दयोरभिन्नार्थकत्वावगमेन सवित्रपेक्षया वरणीयत्वस्य ततो बोधासंभवात्। न च सवितृवरेण्यशब्दयोरन्वयः तत्र सिद्ध एवेति वाच्यम्। तावतापि पराभिमतभेदान्वयबोधौपयिकाकाङ्क्षाविरहः सिद्ध एव। न च **'स वा एवं प्रवरणाय'** इत्यनेन प्रवरणकर्तुरेव तच्छब्देन विवक्षणात् सवितृकर्तृकवरणकर्मणः ततो लाभ इति वाच्यम्। तथा सति **'असौ वा आदित्यः सविता'** इत्यत्र अदश्शब्देन पूर्ववाक्योक्तप्रवणार्थस्य परात्मनः तस्मिन्नभेदान्वययायोगात् **'स वा एवमित्यत्र'** वाशब्दस्यावधारणार्थकस्य सांगत्यापत्तेश्च।

किं च उक्तसवितृवरेण्यशब्दयोः परस्परमभेदान्वयो न विवक्षितः। असमानविभक्तिकत्वात्। किं तु वरेण्यपदस्य सवितृपरत्वे वरेण्यपदार्थविशेष्यस्य भर्गपदार्थस्य सवितृपदवाच्यब्रह्मणा सहाभेदसंबन्धेन संबन्धित्वं षष्ठ्यर्थ इति ब्रह्मण एव सवितृशब्दार्थत्वेऽपि तस्यैव ध्येयत्वमिति सूचनाय तथाऽभिधानम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



एवं चासंकोचात् सर्वैर्वरणीयं भर्गपदवाच्यं तेजः जगत्कारणीभूतसवितृदेवसंबन्धि-ब्रह्म उपास्महे इति विशिष्टैकार्थविषयको बोधः श्रौतव्युत्पत्तिक्लेशं विनैव सिध्य-तीति बोध्यम्।

न चाभेदस्य षष्ठ्यर्थत्वमयुक्तमिति शङ्क्यम्। विशेषणविशेष्ययोः प्रका-रान्तरेणाभेदे निर्णीते तत्र षष्ठ्या अभेदार्थकत्वस्यादोषत्वात्। संबन्धत्वेन संबन्ध-सामान्यस्यैव षष्ठीवाच्यत्वमते अभेदस्थलेऽपि संबन्धत्वेनाभेदबोधे बाधकाभावात् 'राहोश्शिर' इत्यादिषु तथैव निर्वाहात् अभेदातिरिक्तसंबन्धत्वं तु न षष्ठीप्रवृत्तिनि-मित्तम्। गौरवात्।

न चैवं **'ऋद्धस्य राजमातङ्ग'** इति प्रयोगापत्तिरिति वाच्यम्। अभेदातिरि-क्तसंबन्धेन ऋद्धसंबन्धित्वविवक्षायां तथा प्रयोगस्य साधुत्वेन तत्संबन्धसाधारण-संबन्धत्वेन संबन्धविवक्षायामपि साधुत्वस्य स्वीकर्तुमुचितत्वात्। परं तु संबन्धत्वावच्छिन्नाभेदसंबन्धनिष्ठप्रकारताशालिबोधे षष्ठ्यन्तपदस्य न स्वारसिकः प्रयोग इति बोध्यम्। अत एव तत्त्वमुक्ताकलापे **'यो मे हस्तादिवर्ष्म'** इति श्लोके **'स्यान्ममात्मेत्यगत्या'** इत्यनेन षष्ठ्याःअभेदार्थकत्वम् आचार्यैर्व्यवस्थापितम्।

यच्चोक्तं सर्वधीप्रेरकत्वस्यासंकुचितस्य सूर्ये बाधात् तृतीयपादस्थयच्छ-ब्दस्य सूर्यपरत्वं न संभवति। रुद्रपरत्वे तु तस्य सर्वान्तर्यामितया तदुपपत्तिरिति— तदपि न— भवत्पक्षे सवितृपदस्य वरेण्यपदेनान्वयेऽसंकुचितसर्ववरणीयत्वस्या-सिद्धिप्रसङ्गात्। सर्वान्तर्यामित्वस्यान्तर्यामिब्राह्मणसिद्धस्य **सर्वशाखाप्रत्ययन्या-येन सुबालोपनिषदि** सर्वान्तर्यामित्वेन सिद्धे नारायण एव पर्यवसानात् रुद्रस्य तत्त्वासिद्धेश्च। यानि च **कूर्मपुराणादिषु** शिवस्य सर्वान्तर्यामित्वबोधकानि वच-नानि **तान्यन्तर्यामिब्राह्मण** विरुद्धत्वात् तामसपुराणोक्तत्वाच्चोपक्षणीयान्येव।

अन्तरादित्यविद्यायाः श्रीमन्नारायणपरत्वेन स्थापनात् आदित्यमण्डलान्त-र्वर्तित्वं शिवस्येत्यपि न समीचीनम्।

यच्च अकारान्तभर्गपदस्य शिवे रूढितया सान्तस्य कुत्राप्यरूढेः योगाद्रूढे-र्बलीयस्त्वात् किंचिद्विकृतस्यापि सान्तस्य रूढ्यैवार्थबोधनमिति तेजः परत्वं तस्य नादरणीयमिति—तदपि न— पूर्वमेव सावित्र्युपनिषदा आकारान्तस्य भर्गपदस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



तेजसि रूढेरस्माभिः प्रपञ्चनात् **'भर्गो रुद्रस्तथाऽऽलोक'** इति नानार्थरत्नमालायाम् अकारान्तभर्गपदस्यालोके रूढेः कथनात् **'भर्गसीरेत आलोकौ'** इति **वैजयन्ती-कोशे** सान्तस्याप्यालोके रूढ्यभिधानाच्च उभयथापि तेजसि सिद्धां रूढिं परित्यज्य अकारान्तरूढिमात्रेण शिवपरत्वस्यायुक्तत्वात् । न चालोकत्वावच्छिन्न एव रूढिः सिद्धा; न तेजस्त्वावच्छिन्नपरत्वमस्येति तेजस्त्वावच्छिन्नस्य कथं भर्गपदेन शक्त्या बोध इति वाच्यम् । तेजश्शब्दस्यापि **'तेजः प्रभावे दीप्तौ च'** इति **अमरकोशेन** आलोकवाचितयैव सिद्धत्वेन दोषाभावात् । तथा च गीतायाम्—

**'यदाऽऽदित्यगतं तेजः जगद्भासयतेऽखिलम् ।**
**यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥'**

इति । प्रभापरस्तेजश्शब्दः । आलोकाभावस्य तमस्त्ववादिभिः तेजस्सामान्याभावस्तम इत्यभिधीयते ।

न च **'अग्निर्वै भर्ग'** इति श्रुत्या आलोकवत एव शक्यत्वावधारणात् कथमालोकस्य शक्यतेति वाच्यम् । तत्र आलोकत्वस्य शक्योपलक्षणत्वेन आलोकतदाश्रयसाधारणतेजस्त्वावच्छिन्न एव रूढेरभ्युपगमात् । तेजस्त्वं चोभयसाधारणजातिविशेषः चाक्षुषप्रत्यक्षकारणतावच्छेदकतया सिद्धः ।

वस्तुतः **'भर्गाख्यं विष्णुसंज्ञम्'** इति श्रुतेः विष्णुत्वावच्छिन्न एव रूढेः स्वीकारात् भर्गशब्देनादित्यमण्डलान्तर्वर्तिनः श्रीविष्णोरिव बोध इति न काप्यनुपपत्तिः ।

यत्तु विष्णुशब्दस्य व्यापनशीलवाचित्वात् रुद्रेऽपि तादृशावयवार्थस्याबाधात् तस्यैव भर्गशब्दवाच्यत्वं वाक्यान्तरसहकारादवसीयत इति—तदपि फल्गु—स्वेनैव योगात् रूढेः बलीयस्त्वस्य पूर्वमभिधानेन प्रकृते तन्न्यायेन विष्णावेव तत्पदवाच्यत्वसिद्धेः । न च शिवेऽपि भर्गपदस्य रूढ्या तस्यैव गायत्रीप्रतिपाद्यत्वबोधकवचननिचयेन च तदनुरोधेन उक्तरूढेः परित्याग इति वाच्यम् । हर्यादिपदानामिव भर्गपदस्यापि नानार्थकतयाऽप्युक्तश्रुत्यनुरोधेन विष्णावपि रूढिसिद्धेः । न च तावताऽपि गायत्र्याः शिवपरत्वं कथं व्यावर्तनीयमिति वाच्यम् । सामान्यतो भर्गपदस्य शिवे रूढावपि गायत्रीस्थभर्गपदस्य विष्णावेव रूढिग्रहेण एतादृशरू-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



ढिज्ञानस्य सामान्यरूढिज्ञानादिना शाब्दबुद्धौ प्रतिबन्धकत्वस्य स्वीकारेण तद्बोधासंभवात्। अत एव आकाशशब्दस्य भूताकाशरूढावपि **'दहरोऽस्मिन्नन्तर आकाश'** इत्यत्राकाशशब्दस्य परमात्मरूढिर्बलीयसीत्युक्तम्।

एवं **'भर्गाख्यं विष्णुसंज्ञितम्'** इत्यत्र विष्णुपदात्मकसंज्ञासंबन्धिन एव भर्गपदवाच्यत्वप्रतीत्या शिवस्य च विष्णुपदसंज्ञावत्त्वाभावात्। उक्तवाक्येन शिव एव रूढिः गृह्यत इति वचनमयुक्तम्। विष्णुपदसंज्ञावत्त्वं च विष्णुपदनिष्ठरूढिशक्तिकर्मत्वमेव। पूर्वपदात् **संज्ञायामग** इत्यादिषु तथैव बोधात्। एवमर्थमभिप्रेत्यैव हि भर्गाख्यो विष्णुरित्यभिधाय **'भर्गाख्यं विष्णुसंज्ञितम्'** इत्युक्तम्। एवमुक्तश्रुत्या सकारान्तघटकभर्गेत्यानुपूर्व्या एव विष्णुरूढ्यवच्छेदकत्वग्रहणेन सान्तत्वे वा भर्गपदस्य विष्णोः शक्त्यैव बोधः। सान्तत्वे शिवस्य लक्षणया योगेन वा बोध इति गायत्र्या विष्णुपरत्वमेव वरम्। उक्तश्रुतिविरोधादेव **पुराणवचनान्यपि विरोधाधिकरणन्यायादुपेक्षणीयानि**।

**श्रीमन्मैत्रायणीयश्रुतिसमधिगतादन्तभर्गोक्तिभूम्ना**
**सावित्र्याभावमाहुः पुरभिदि कतिचित् तन्न युक्तं ह्यदन्तः।**

**भर्गाख्ये विष्णुसंज्ञे महसि नियमितो रूढिशक्त्यैव भर्गः**
**सावित्र्याभावमस्मिन्नकथयदुचितं रङ्गनाथः सुमेधाः॥**

**विद्यावारिनिधेर्विधूततमसो विध्वस्तनित्यद्विषो**
**विष्णुध्यानपरायणस्य सततं विश्वम्भरालङ्कृतेः।**

**श्रीमत्कौशिकवेङ्कटेश्वरगुरोः सूनुः सुधी रङ्गराट्**
**सावित्र्यर्थनिरूपणं समतनोत् सत्तर्कवाचस्पतिः॥**

**सावित्रीवादसर्वस्वं श्रुतिस्मृतिमनोरमम्।**
**करोतु सुमनो हर्षं कलापूर्णेन्दुबिम्बवत्॥**

सावित्र्यर्थसर्वस्वं संपूर्णम्।

**सावित्र्यर्थस्य वादे सकलसुमनसां साधुसंभावनीये**
**निर्दोषेऽल्पिष्ठदोषान् कतिचन कथयामासुरेके तु तेषाम्।**

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



**कल्पान्तारम्भजृम्भच्छ्वसनसमुदयोल्लोलतूलादिवृत्तिं**
**सद्भिस्तर्कैर्नयामो महितबुधवचो दत्तहस्तावलम्बैः ॥**

यत्तु प्रकाशानुमेयत्वं रुद्रस्याप्यस्ति । तद्विग्रहीयप्रभाविशेषेण तद्विग्रहावच्छिन्नरुद्रस्याप्यनुमानसंभवात् इति—तन्न—आलोकत्वावच्छिन्नहेतुकानुमितिविधेयताया एव प्रकृते विवक्षितत्वेन रुद्रे तस्यासंभवात् । 'पर्वतः आकाशो वा तेजस्वी आलोकात्' इत्यनुमानदर्शनात् तेजसः तत्सिद्धिः । न च आलोकत्वावच्छिन्नहेतुकानुमितिविधेयतायाः रुद्रात्मन्यसंभवेऽपि रुद्रविग्रहे तेजोमये तेजस्त्वेन तादृशानुमितिविधेयत्वसंभवात् तद्विग्रहस्यापि रुद्रशब्दवाच्यत्वात् उक्तयोगार्थरूढ्यर्थयोः अभेदान्वयसंभवात् भर्गपदस्य रुद्रत्वावच्छिन्नपरत्वेऽपि नानुपपत्तिरिति वाच्यम् । तथा सति **'धियो यो नः प्रचोदयात्'** इत्यत्र यच्छब्देनापि तस्यैव परामर्शनीयतया तस्य च सर्वप्राणिधीप्रेरकत्वस्यासंभवेन रुद्रात्मन एव भर्गशब्देन विवक्षणीयतया पूर्वोक्तबाधतादवस्थ्यात् ।

न च **'नृसिंहो भगवान् श्वेतः' 'नारायणो घनश्यामः'** इत्यादिषु भगवदादिशब्दार्थे दिव्यात्मस्वरूपे श्वेतरूपवदभेदस्य बाधेऽपि सामानाधिकरण्यनिर्देशेन शरीरात्मभावलक्षणतादात्म्यसंबन्धेन श्वेतपदार्थस्य भानस्य नृसिंहादिपदार्थैकदेशे शरीरे श्वेतादिपदार्थानामभेदेनान्वयस्य वा अभ्युपगन्तव्यतया प्रकृतेऽपि योगार्थस्य रूढ्यर्थेऽपि तथाऽन्वयः संभवतीति किमनुपपन्नमिति वाच्यम् । एवमपि रूढ्यर्थरुद्रत्वावच्छिन्ने उक्तानुमितिविधेयस्यान्वये धर्मितावच्छेदकरुद्रत्वावच्छिन्नत्वस्यानुमितिविधेयतायां भानेन तस्य च बाधात् तथाविधार्थस्योक्तवाक्येन बोधासंभव एव । तथा सति वाक्यस्याप्रामाण्यापत्तेः । न च रुद्रत्वोपलक्षित एव तद्भासतामिति वाच्यम् । धूमेन वह्निरनुमीयते न घटेन इत्यादिप्रयोगनिर्वाहाय तादृशान्वयितावच्छेदकविशिष्ट एव विधेयान्वयस्य स्वीकर्तव्यत्वात् । अन्यथा पर्वतो द्रव्यवान् घटादिति घटहेतुकानुमितिविधेयतायाः द्रव्यत्वावच्छिन्नायाः द्रव्यमात्रवृत्तेः वह्नावपि सत्त्वेन घटेन वह्निरनुमीयत इति वाक्यस्य प्रामाण्यापत्तिः । **गदाधरेण च व्युत्पत्तिवादे** तृतीयार्थविचारे **'अत्रेदमवधेयम्'** इत्यादिना अयमेवार्थः स्पष्टीकृतः । एतेन द्रव्यवान् तेजोविशिष्टद्रव्यवान् वा आलोकादित्यनुमितिविधेय-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



तायाः रुद्रे संभवात् उक्तालोकलिङ्गकानुमितिविधेयत्वं रुद्रेऽक्षतम् इति शङ्कापि निरस्ता।

न च रुद्रस्य विभुत्ववादे 'रुद्रवानालोकात्' इत्यनुमितेरपि प्रमात्वसंभवेनोक्तानुमितिविधेयत्वं रुद्रत्वेन रुद्रस्याप्यक्षतमिति वाच्यम्। वृत्तिनियामकसंयोगसंबन्धावच्छिन्नत्वस्य विधेयताविशेषणत्वेन दोषाभावात्। एवं भर्जकत्वमपि रूपपरावृत्तिजनकत्वं पूर्वरूपनाशकत्वपर्यवसितम्। तच्च तेजस एव। दाहं प्रति तेजसः कारणत्वात्। रूपं चात्र चाक्षुषसाक्षात्कारहेतुभूतः गुणविशेषः। न तु धर्ममात्रम्। अतः रूपपदस्य जगद्गतस्थूलावस्थापरत्वेन तद्विरोधिसूक्ष्मावस्थारूपोपसंहर्तृत्वमादाय रुद्रे भर्जकत्वकथनमसारतया छलोक्तिरिति मन्तव्यम्।

यच्चोक्तं **'य एषोऽन्तरादित्ये तारकेऽक्षिणि च एष भर्गाख्य'** इति वाक्यस्य विशेषधर्मावच्छिन्ने रूढिग्राहकत्वासंभवात् यौगिकस्य भर्गपदस्य विशेषवाचकरुद्रपदेनैव रूढ्यर्थसमर्पणमिति वाक्यान्तरस्थरुद्रपदस्य पूर्ववाक्ययोजना आवश्यकीति तदिदमन्धचोद्यम्। अन्तरादित्यविद्यायाः विष्णुत्वावच्छिन्नपरतायाः सोपपत्तिकमस्मिन्नेव ग्रन्थे उक्तत्वेन तस्यैव **'य एषोऽन्तरादित्य'** इति वाक्यस्थयच्छब्देन निर्देशसंभवेन तत्रैव **'एष भर्ग'** इति भर्गपदरूढेः प्रदर्शनात्। अन्यथा रुद्रपदयोजनायां **'य एषोऽन्तरादित्य'** इत्यादिवाक्यस्य वैयर्थ्यप्रसङ्गात्।

यच्चोक्तं शिवस्य तामसत्वं तमोनिग्रहीतृत्वमेव। अत एव मुमुक्षूपास्यत्वं च तस्य संभवतीति तस्य गायत्र्यर्थत्वं संभवति। तथा चोक्तं **श्रीभागवते** रुद्रचरित्रवर्णने—

**'यस्यानवद्यं चरितं मनीषिणः गृणन्त्यविद्या पटलं बिभित्सवः।**
**निरस्तसाम्यातिशयोऽपि यस्स्वयं पिशाचचर्यामचरत् सतां गतिः॥'** इति।

तदेतत् परकीयग्रन्थानवलोकनमूलम्। पूर्वग्रन्थे हि **श्रीभागवतादि**श्लोकानुदाहृत्य शिवस्य मुमुक्ष्वनुपास्यत्वकथनात्। उक्तरुद्रचरित्रवर्णने शिवस्याविद्यानिवर्तकत्वादिकं यदुच्यते तदपि **'उपास्योऽयं सदा विप्राः उपायोऽस्मि हरेस्स्मृतौ'** इति **हरिवंशे** कैलासयात्राप्रकरणे शिवोक्तलोकोपबृंहितया

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



'स नो देवः शुभया स्मृत्या संयुनक्तु'

इति तैत्तिरीयश्रुत्या प्रतिपन्नमोक्षहेतुज्ञानप्रदत्वेन नेतव्यम्। अत एव 'शङ्करात् ज्ञानमन्विच्छेत् मोक्षमिच्छेत् जनार्दनात्' इति मात्स्यपुराणवचनमपि संगच्छते। श्रीमति भागवते च शिवस्य भगवद्विभूतित्वं 'ब्रह्मेशाद्या देववरा यस्य विभूतिः इति' 'नेमं विरिञ्चो न भव' इत्यादिषु बहुशो दृष्टम्। किं बहुना रुद्रवैभवप्रकरणे श्रीधरस्वामिभिः—

'निर्गुणं सगुणं चैव शिवं हरिपराक्रमैः' इत्युदाहृतम्।

यच्चोक्तं भर्जयतीति भर्ग इति यौगिकतया निरुक्तस्य भर्गपदस्य विशेष्यसाकाङ्क्षतया रुद्रपदाध्याहारमन्तरा वाक्यस्य परिपूर्तिरिति तत्रैव तद्योजनं युक्तमिति-तदतिस्थविष्ठम्— 'एष भर्गाख्य' इति भर्गशब्दरूढेः विष्णुत्वावच्छिन्ने पूर्वमेव निर्धारिततया तस्यैव एष भर्ग इति अवयवार्थत्वस्यापि निश्चयसंभवेन रुद्रपदयोजनाया अनावश्यकत्वात्। न ह्यनाकाङ्क्षितस्यार्थस्याभिधानं युक्तम्। अतः स्वस्थान एव स्वस्थोऽयं रुद्रशब्दः उक्तक्रियाकर्तृतामेव रुद्रे बोधयति।

यत्तु तामसत्वे रुद्रस्य तमोगुणकार्यमोहवत्त्वेन गायत्रीप्रतिपाद्ययथावस्थितत्त्वार्थबोधकत्वं भवदभिमतं न स्यादिति—तन्न—सर्वज्ञत्वेन प्रसिद्धस्य तस्य न हि सर्वदा मोहवत्त्वम्। किं तु कादाचित्कम् तमोगुणाभिभूतत्वं चतुर्मुखवत्। उक्तं हि चतुर्मुखस्य रजोऽभिभूतत्वं 'एतेन योगः प्रत्युक्तः (ब्र. सू. २-१-३) इति योगमतनिराकरणावसरे योगमतस्य चतुर्मुखप्रवृत्तस्याप्रामाणिकत्वं वदता भगवता बादरायणेन। एवमेव तदर्थो विवृतः भगवता भाष्यकृता च। अथ वा तामसत्त्वं उत्पत्तिकाले स्वदृष्टानां पुरुषाणां तमोगुणवर्धकत्वम्। तथा चोक्तम् महाभारते मोक्षधर्मे—

'पश्यत्येनं जायमानं ब्रह्मा रुद्रोऽथवा पुनः।
रजसा तमसा चैव मानसं समभिप्लुतम्॥'

इति। ब्रह्मानन्दादिभिरपि तमोमूर्ते रुद्रस्यानुपास्यत्वमुक्तं बिन्दुटीकादिषु।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



यच्चोक्तं इतिपदेन व्यवधानात् वाक्यान्तरस्थरुद्रपदस्य पूर्ववाक्ययोजना न संभवति इत्यत्र **'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'** इति वाक्ये एवकारस्य मृत्तिकाशब्देनान्वयात् इहापि तथान्वयः संभवतीति— तदपि न— न हि वाक्यान्तरस्थपदानां योजनैव नास्तीति न ब्रूमः। श्लोकादिषु तथा दर्शनात्। परं तु गत्यन्तरे संभवति तस्यासाधुत्वमेव। प्रकृते च स्वस्थान एव प्रकृतान्वयोपपत्तौ वाक्यान्तरे तद्योजनस्यासाधुत्वमिति ब्रूमः। **'मृत्तिकेत्येव सत्यम्'** इत्यत्र मृत्तिकैव सत्यमिति कल्पनं त्वसाध्वेव। इतिपदवैयर्थ्यात्। न च मृण्मयं मृत्तिकैव इति सत्यमिति मृण्मयत्वव्यापकत्वं मृत्तिकात्वे विधाय तद्वाक्यार्थमितिशब्देनानूद्य तस्य सत्यत्वं विधीयत इति नेतिपदवैयर्थ्यमिति वाच्यम्। मृत्तिकैव मृण्मयं सत्यमिति मृत्तिकान्यावृत्तिमृण्मयत्वविशिष्टस्य सत्यत्वप्रतिपादनेनैव सामञ्जस्येन वाक्यद्वयकल्पने मानाभावात्। न च परमतेऽपीतिपदस्य कथं सार्थक्यमिति चेत्-इत्थम्-मृत्तिकैवेत्यत्र मृत्तिकापदं मृत्पिण्डपरम्, पूर्ववाक्यानुरोधात्। इतिपदार्थोऽभेदः। मृण्मयमित्यनुषज्यते। तथा च मृत्पिण्डानुयोगिकाभेदवन्मृण्मयमेव सत्यमिति विशिष्टैकार्थबोधकत्वेन एकवाक्यत्वनिर्वाहकत्वात्। न च मृत्पिण्डो मृण्मयमिति सामञ्जस्ये अभेदार्थकम् इतिपदं व्यर्थमेव। अभेदसंबन्धेन मृत्पिण्डविशिष्टमृण्मयस्य सत्यत्वप्रतिपादनादेव एकवाक्यनिर्वाहादिति वाच्यम्। एकस्मिन् धर्मिणि विरुद्धकालावच्छिन्नवृत्तिकयोः धर्मयोः धर्मिनिष्ठतादात्म्यसंसर्गप्रतियोगित्वानुयोगित्वयोरवच्छेदकत्वे मानाभावेन मृत्पिण्डमृण्मययोः तादात्म्यसंबन्धावगाहिज्ञानस्य भ्रमत्वापत्त्या तथा विवक्षाया असंभवात्।

वस्तुतः मृण्मये मृत्पिण्डाभेद एव सत्यमिति बोधार्थं इतिपदप्रयोगः। तल्लाभश्च मृत्तिकेत्येव सत्यमित्यत्र इतिशब्दस्याभेदोऽर्थः। तत्र च मृत्तिकापदार्थस्य मृण्मयपदार्थस्य च आधेयतासंबन्धेनान्वयः। एवं च मृत्पिण्डतद्विकारोभयवृत्तिः अभेदः एव प्रामाणिक इति बोधात्। न चात्रैवकारवैयर्थ्यम्। मृत्पिण्डतद्विकारयोर्भेदाभेदयोः कैश्चिदभ्युपगमात् तद्व्युदासकतया सार्थक्यात् इति ध्येयम्।

यदपि **'रुद्रो ब्रह्मवादिन आहुः'** इत्यत्र उक्तिक्रियाकर्तृत्वेन रुद्रस्य विवक्षायां चशब्दोऽपेक्षितः। अन्यथा एकवाक्यत्वासंभव इति-तदसमञ्जसम्—'चैत्रमैत्रौ

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



गच्छत' इत्यत्र चैत्रमैत्रोभयत्वावच्छेदेन गमनकर्तृत्वान्वयवत् 'चैत्रो मैत्रो गच्छत' इत्यत्रापि आख्यातोपात्तद्वित्वविशिष्टयोः चैत्रमैत्रयोः गमनकर्तृत्वान्वयसंभवात् चशब्दस्यानपेक्षणात्। अत एव **'न क्रोधो न च मात्सर्यम्'** इत्यत्र च शब्दाभावेऽप्येकवाक्यत्वोपपत्तिः। **'न च मात्सर्यमि'** त्यत्र चशब्दस्य सत्त्वात् तत्र नानुपपत्तिरिति वाच्यम्। **'न च मात्सर्यमित्यत्रैकपदतया मात्सर्याभावबोधकत्वेन** चशब्दस्य तत्राभावात्। न च **क्रोध** इत्यत्रानुयोगिवाचकपदाभावात् क्रोधाभावबोधानुपपत्तिरिति शङ्क्यम्। समासस्थले तदनङ्गीकारात्, अत्र नशब्देन समासात्। अत एव 'असंदेहः' 'अघट' इत्यादिनिर्देशः संगच्छते।

**सौदामिनीशतसमाकुलसान्द्रतोय-**
**जीमूतगर्वहरसुन्दरगात्रशोभम्।**
**गोपाङ्गनाकुटिलवीक्षणवर्मितं श्री-**
**गोपालमेव हृदये सततं स्मरामि॥**

इति श्रीबालधन्विकुलजलधिसन्तानायमानानां
पदवाक्यप्रमाणपारावारपारीणानां
सत्तर्कवाचस्पतीनां श्री
रङ्गाचार्याणां कृतिषु
सावित्र्यर्थसर्वस्व
नामायं ग्रन्थः
संपूर्णः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

# सावित्र्यर्थसर्वस्वे प्रमाणतयोद्धृतानां ग्रन्थतत्कर्तृवचनानां सूची


| | पृष्ठम् | पङ्क्तिः |
|---|---|---|
| अक्षिण | ५ | २१ |
| अगस्त्यविश्वामित्राभ्यां | ८ | ३ |
| अगस्त्यविश्वामित्रौ | १८ | २६ |
| अगस्त्यसनकस्मृतौ | ९ | ७ |
| अग्निर्वै भर्गः | ३ | ७ |
| „ | ५ | १७ |
| „ | २२ | ८ |
| अत्रेदमवधेयम् | २४ | २५ |
| अथ खलु वा अस्य | ४ | १७ |
| अथ भर्ग इति | २ | ११ |
| अथ भर्गो देवस्य | २ | १९ |
| अथ योऽस्य तामसोंऽशः | ४ | १५ |
| अनपहतपाप्मा वा | ३ | २४ |
| अन्तर्यामिब्राह्मण | २१ | १८ |
| अमरकोशेन | २२ | ६ |


CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center




| | | |
|---|---|---|
| अमृतत्वस्य | ४ | ७ |
| अशरीरं शरीरेषु | ६ | ४ |
| अशुद्धास्ते समस्तास्तु | ४ | २० |
| असौ वा आदित्यस्सविता | ७ | १३ |
| " | २० | १५ |
| " | २० | २० |
| अहिर्बुध्न्येन | ८ | १ |
| आचार्यैः | २१ | १४ |
| आदित्यमण्डलासीनं | ८ | २२ |
| आदित्यमण्डले | ९ | ८ |
| आरण्यके | ११ | २० |
| ईश्वरं पुरुषाख्यं च | ९ | ५ |
| उपनयेन योजनयैव | १५ | १ |
| उपास्योऽयं सदा | ११ | १६ |
| " | २५ | २४ |
| ऊर्ध्वमेकः | ७ | १ |
| एकदेशस्थितस्याग्नेः | ३ | १३ |
| एतेन योगः प्रत्युक्तः | २६ | १७ |
| एवं ध्यात्वा | ९ | १५ |
| एष भर्ग | ५ | ११ |
| " | २५ | १५ |
| कठवल्ल्यां | ६ | ३ |


CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



| | | |
|---|---|---|
| किरीटहार | ९ | १० |
| कूर्मपुराणादिषु | २१ | २० |
| कैलासयात्राप्रकरणे | २५ | २५ |
| कौषीतकी | ५ | २५ |
| क्लेशकर्मविपाकाशयैः | १० | १० |
| गदाधरेण | १ | २४ |
| " | १५ | १ |
| " | २४ | २५ |
| गीतायां | २२ | ७ |
| गीतिज्ञो यदि | ७ | ५ |
| छान्दोग्य | ५ | २५ |
| जुहाव सर्वभूतानि | ४ | २ |
| ज्योतिर्दर्शनात् | ७ | २० |
| तत्सवितुर्वरेण्यं ध्रुवं | ९ | २ |
| तदक्षरं तत्सवितुः | २० | १ |
| तदिति द्वितीयैकवचनं | ८ | १९ |
| तस्याः द्वितीयः पादो | ३ | ४ |
| तान्त्रिकैः | १४ | २२ |
| तारके | ५ | २१ |
| तेजः प्रभावे दीप्तौ च | २२ | ६ |
| तैत्तिरीयश्रुतिः | २० | २ |
| तैत्तिरीयश्रुत्या | २६ | २ |

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center




| | | |
|---|---|---|
| दहरोऽस्मिन्नन्तर | २३ | २ |
| दीधिति | १५ | ५ |
| दीधितिकृत् | १५ | १२ |
| देवस्य सवितुर्मध्ये | १९ | २ |
| " | १९ | ६ |
| देवस्य सवितुस्तेजः | १० | ६ |
| धर्माधर्मौ | १० | १२ |
| धियो यो नः | ७ | २१ |
| धियो यो नः प्रचोदयात् | २४ | १० |
| धीमहि | १ | १२ |
| ध्यानयोगेन संपश्येत् | ६ | १८ |
| ध्यायन् जपेत् | ८ | २३ |
| " | ८ | २५ |
| ध्यायेमहीति | १० | ७ |
| ध्यै चिन्तायाम् | ८ | १४ |
| न क्रोधो न च मात्सर्यं | २८ | ३ |
| नानार्थरत्नमालायां | २२ | १ |
| नारायणो घनश्यामः | २४ | १३ |
| निरस्तसाम्यातिशयः | २५ | २१ |
| तच्छब्देन भर्गो | १० | ४ |
| तत्त्वमुक्ताकलापे | २१ | १३ |
| तत्सवितुः | १ | १२ |


CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



| | | |
|---|---|---|
| तत्सवितुः | २ | १० |
| " | ७ | १३ |
| निर्गुणं सगुणं चैव | २६ | ७ |
| नृसिंहो भगवान् श्वेतः | २४ | १३ |
| नेमं विरिञ्चो न भव | २६ | ५ |
| पञ्चरात्रादिषु | ६ | २ |
| परमात्मा च सर्वेषां | ६ | १४ |
| पराशरेण | ४ | २२ |
| " | ६ | १६ |
| पवित्रवन्त | ११ | २० |
| पश्यत्येनं | २६ | २२ |
| पाशुपतमतानुयायिनः | १ | ७ |
| पुत्रोदयात् तं | १९ | ३ |
| पुराणवचनानि | २३ | ११ |
| पुरुषसूक्त | ४ | ६ |
| प्रपञ्चसारे | ८ | १९ |
| प्रसन्नवदनं | ९ | १३ |
| प्रसादयामास | ११ | १२ |
| प्रेरयेत्तस्य | २ | २५ |
| " | १८ | २५ |
| " | १९ | २३ |
| बादरायणः | ५ | २७ |

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center




| | | |
|---|---|---|
| बादरायणेन | २६ | १८ |
| बिन्दुटीकादिषु | २६ | २४ |
| ब्रह्मलोकमतिक्रम्य | ७ | २ |
| ब्रह्मवादिन | ७ | १८ |
| ब्रह्मानन्दादिभिः | २६ | २४ |
| ब्रह्मेशाद्या देववरा | २६ | ४ |
| भञ्ज आमर्दने | ९ | २४ |
| भट्टभास्करीये | ११ | २४ |
| भरद्वाजः | ९ | २० |
| भर्गसी रेत आलोकौ | १८ | २२ |
| " | २२ | २ |
| भर्गाख्यं विष्णुसंज्ञं | ९ | ६ |
| " | २२ | १६ |
| " | २३ | ४ |
| " | २३ | ८ |
| भर्गो देवस्य धीमहि | ७ | १७ |
| " | १९ | २० |
| भर्गो रुद्रस्तथा | २२ | १ |
| भा दीप्तौ | १० | १ |
| भागवते | २६ | ४ |
| भारद्वाजसंहितायां | ८ | १ |
| भाष्यकृता | ६ | १० |


CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



| | | |
|---|---|---|
| " | २६ | १९ |
| भाष्ये | ७ | २१ |
| भुवो भर्गो देवस्य | ३ | ५ |
| भृजी भर्जने | ९ | २४ |
| मण्डलं तस्य | ६ | २२ |
| मन्त्रदीपिकायां | १० | ३ |
| महादेवस्सर्वमेधे | ४ | ३ |
| महाभारते | ३ | २५ |
| " | २६ | २० |
| मात्स्यपुराण | २६ | ३ |
| मृत्तिकेत्येव सत्यं | २७ | ६ |
| मैत्रायणीय | १९ | १० |
| " | १९ | १६ |
| मैत्रायणीयशाखायां | २० | १४ |
| " | २० | १९ |
| मैत्रायणीयश्रुतिः | ९ | २ |
| " | १९ | ४ |
| मैत्रायणीयोपनिषदि | २ | १० |
| " | ७ | ९ |
| " | १० | १५ |
| मोक्षधर्मे | ११ | ११ |
| " | २६ | २१ |

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center




| | | |
|---|---|---|
| य एषोऽन्तरादित्ये | ३ | १५ |
| » | ५ | ११ |
| » | ८ | १५ |
| » | २५ | १० |
| » | २५ | १४ |
| » | २५ | १६ |
| यच्चन्द्रमसि | २२ | ८ |
| यदादित्यगतं | २२ | ८ |
| यदेष रुद्रो भर्गाख्य | १९ | १६ |
| यद्वृत्तयोगः प्राथम्यं | १५ | ३ |
| यस्मिन्नेतैः | १० | १३ |
| यस्यानवद्यं चरितं | २५ | २० |
| याज्ञवल्क्यस्मृतौ | ६ | १७ |
| याज्ञल्क्याशयः | ७ | ७ |
| युक्तः परः पुरुषः | ४ | २४ |
| योगयाज्ञवल्क्यः | ९ | ४ |
| योगयाज्ञवल्क्यस्मृतिः | १९ | ४ |
| योगयाज्ञवल्क्यस्मृतौ | १९ | २४ |
| योगसूत्रानुसारेण | १० | ११ |
| यो देवस्सविता | ५ | १४ |
| » | १८ | २४ |
| » | १९ | २२ |


CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center




| | | |
|---|---|---|
| यो भर्गः | १९ | २५ |
| यो मे हस्तादिवर्ष्म | २१ | १३ |
| योऽस्य भर्गस्तं | १९ | २१ |
| रजसा तमसा | २६ | २३ |
| रुद्रस्यानुचरो | ७ | ६ |
| रुद्रो ब्रह्मवादिन | २७ | २५ |
| लिङ्गभूयस्त्वाधिकरणे | ६ | १० |
| लौहित्यनीलकण्ठेन | १० | ३ |
| वरदराजीये | ८ | ९ |
| वरेण्यं वरणीयं | ११ | २१ |
| वाचारम्भणं विकारो | २७ | २ |
| विज्ञानेश्वरेण | १० | १० |
| विद्यारण्यैः | ११ | २३ |
| विद्यासहायवन्तं मां | ४ | १३ |
| विश्वरूपो महादेवः | ४ | १ |
| विश्वामित्रः | ८ | २१ |
| विष्णुनामा स | ६ | १५ |
| विष्णु पुराणे | ३ | १२ |
| " | ४ | १९ |
| वृङ् संभक्तौ | ८ | १० |
| वैजयन्ती | १८ | २२ |
| वैजयन्तीकोशे | २२ | २ |


CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



| | | |
|---|---|---|
| व्युत्पत्तिवादे | १ | २४ |
| " | २४ | २५ |
| शङ्कराज्ज्ञानं | २६ | ३ |
| शरणं च | ११ | १३ |
| शाङ्करसहस्रनामभाष्ये | ११ | १७ |
| शान्तिपर्वणि | ११ | १० |
| शिवतत्त्वविवेके | १९ | १६ |
| श्रीधरस्वामिभिः | २६ | ६ |
| श्रीभागवते | २५ | १८ |
| " | २५ | २२ |
| श्रीमद्भागवते | ४ | २२ |
| श्रीमद्भागवते | ११ | १७ |
| श्रीवत्सवनमाला | ९ | ११ |
| श्रुति | ३ | २४ |
| श्रुतेः | २२ | १६ |
| श्रुतौ | ५ | १७ |
| श्रुत्या | ५ | २४ |
| " | २२ | १२ |
| " | २३ | ८ |
| श्रेयांसि तत्र | ४ | २६ |
| षूङ् प्राणिप्रसवे | ९ | २२ |
| स ज्ञेयस्तं | ६ | २३ |

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center




| | | |
|---|---|---|
| सत्त्वं रजस्तम इति | ४ | २३ |
| सत्प्रतिपक्ष | १५ | ५ |
| स नो देवः | २६ | १ |
| सप्रभं सत्यमानन्दं | ८ | २४ |
| सर्वपापविशुद्धात्मा | ९ | १६ |
| सर्वरत्नसमायुक्त | ९ | १४ |
| सर्वाल्लोकान् | ४ | ४ |
| स वा एवं प्रवरणाय | २० | १९ |
| » | २० | २१ |
| सविता वै देवः | २ | २० |
| » | ७ | १८ |
| » | १९ | २१ |
| सविता प्रसवानामीशे | ८ | १० |
| संज्ञायामग | २३ | ७ |
| संसारार्णवमुत्तीर्य | ९ | १७ |
| सावित्र्युपनिषत् | १९ | ७ |
| सावित्र्युपनिषदा | २१ | २६ |
| सावित्र्युपनिषदि | ३ | ४ |
| सुपां सुलक् | १८ | २० |
| सुबालोपनिषदि | २१ | १९ |
| » | २१ | २१ |
| सूत्र | ७ | २१ |


CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



| | | |
|---|---|---|
| सूत्र | १८ | २० |
| सूत्रभाष्य | ३ | २३ |
| सोऽध्वनः पारमाप्नोति | ६ | ५ |
| स्थित्यादयो | ४ | २५ |
| स्मृति | २ | २५ |
| „ | ५ | १५ |
| स्मृतिरत्नाकर | ८ | ८ |
| हरिरेकस्सदा ध्येयः | ११ | १५ |
| हरिं पीताम्बरधरं | ९ | १२ |
| हरिवंशे | ११ | १४ |
| „ | २५ | २५ |
| हिताहितानां | ६ | २१ |

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.